GHOST : I. The soul : q. v. : आत्मन् (m.). Ph. : *the Holy G.* पुरुषोत्तम: ; *to give up the g.* देहं त्यजति v. TO DIE. II. An apparition : भूत:, *a g. lives in this tree* एतस्मिन् पादपे कोऽपि भूत: प्रतिवसति, Ra. II. [comp.

GHOSTLY : I. Spiritual : q. v. II. Pertaining to ghosts : भूत- in

GHOUL : राक्षस: (f. सी), *Brahmin-g.* ब्रह्मराक्षस:.

GIANT : I. A great man : महापुरुष:, *"a g.'s strength"* अतिमानुषं बलं. II. A titan : (1) दैत्य: ; (2) दानव:. *G.'s causeway* *दानवबन्ध:.

GIANT (adj.) : बृहत्काय: (या, यं) : v. also GIGANTIC.

GIANTESS : दानवी (may be applied also to g. females).

GIBBER : अस्पष्टं जल्पति (जल्प्, c. 1.) : v. TO CHATTER.

GIBBERISH : (1) अस्पष्टजल्पितं ; (2) किलकिलायितं (like monkey's).

GIBBET (subs.) : उद्बन्धनकाष्ठं (?) ; वध्यकाष्ठं (?).

GIBBET (v.) : I. Lit. : वध्यकाष्ठं बध्नाति (बन्ध् c. 9.) (?). II. Fig., to brand : अङ्कयति. *To g. a name* : दुर्नाम प्रकाशयति (?).

GIBBOUS : I. Crooked : q. v. : वक्र: (क्रा, क्रं). II. Hunched : q. v.

GIBE (subs.) : गालि:, J. : v. ABUSE.

GIBE (v.) : गालिं ददाति (दा, c. 3.), J. : v. TO ABUSE.

GIBLETS : खगानां हृदयकृदादि ; खगमांसं (?).

GIDDILY : i. e. thoughtlessly : (1) चापल्येन ; (2) चञ्चलतया ; etc.

GIDDINESS : I. Lit. : शिरोघूर्ण: (?), Bha. II. Fig., thoughtlessness : (1) चापल्यं ; (2) चाञ्चल्यं ; (3) चलचित्तता.

GIDDY : I. Lit. : expr. by भ्रमति or भ्राम्यति (भ्रम्, c. 1. and 4.), *I feel g.* शिरो मे भ्रमति. II. Fig. ; fickle : (1) चञ्चलः (ला, लं) ; (2) चपलः (ला, लं).

GIFT (subs.) : I. A present : q. v. : (1) दानं, *great g.* महादानं, He. ; (2) दत्तं, *g.s from brothers* भ्रातृदत्तं, N. s. ; (3) दायः (rare), *g. of love* प्रीतिदायः, Ram. II. An endowment : *you have all the g.s of nature* *सर्वाणि ते स्वाभाविकान्यभिलषणीयानि सन्ति ; शक्तिः (= faculty, power).

GIFTED : I. Endowed : q. v. : अन्वितः (ता, तं) ; सम्पन्नः (न्ना, न्नं). II. Endowed with natural g.s ; शक्तिसम्पन्नः (न्ना, न्नं) (?).

GIG : लघुयानविशेषः. [(?). Comp. दैत्यमल्लः of V. p. v. 20. 64.

GIGANTIC : (1) अतिमानुषः (षी, षं) (= superhuman) ; (2) दानवः (वी, वं)

GIGGLE (v.) : प्रहसति (हस्, c. 1.) (?) : v. TO LAUGH.

GILD (v.) : स्वर्णलं or हैमलं (f. ला) करोति (??) ; स्वर्णेन रञ्जयति (रञ्ज् c. 10).

GILDED, GILT : स्वर्णलः or हैमलः (ला, लं) (??) ; स्वर्णरञ्जितः (ता, तं) (?).

GILDER : expr. by verb, स्वर्णरञ्जकः (??). [face : स्वर्णच्छदः (?).

GILDING : I. The art : स्वर्णरञ्जनं (?) ; स्वर्णकर्मन् (n.). II. The gold sur-

GILL : i. e. quarter of a pint : पादः : v. PINT.

GILLS : of a fish : नासारन्ध्रे (n. dual) (?).

GIMLET : (1) वेधनिका ; (2) आवेधः ; (3) आस्फोटनी.

GIN (subs.) : I. A spirit : शीधुः (?). II. A snare : q. v. : जालं III. A machine : यन्त्रं, *cotton-g.* *कार्पासयन्त्रं.

GIN (v.) : शोधयति (c. of शुध्) : v. TO CLEAN.

GINGER : (1) आर्द्रकं ; (2) शृङ्गवेरं, A. *Dry g.* शुण्ठिः. *G.-bread* : आर्द्रकरसवासितपिष्टकविशेषः. *G.-beer, pop,* or *wine* *आर्द्रकासवं.

GINGERLY : v. CAUTIOUSLY.

GIPSY : *याचः (f. ची) ; काम्बिः (f. म्बी).

GIRAFFE : *दीर्घग्रीवः ; चित्रोष्ट्रः.

GIRD (v. t.) : (1) वेष्टयति, अधि- (वेष्ट्, c. 10.) (= to encircle : q. v.), *g.ed by the mountain......* भूमिभृताधिवेष्टितः (ता, तं), Ki. XII. 22. ; (2)

नह्यति, अपि-, (नह्, c. 4.) (= to fasten), *the matted hair g.ed up with snakes* भुजङ्गमोन्नद्धजटाकलापः (पा, पं), Ku. III. 46.

GIRDER : आधारदारु (n.) (?).

GIRDLE : (1) मेखला ; (2) रस(श)ना ; (3) काञ्ची ; (4) कक्ष्या ; (5) सारसनं ; (6) परिकरः (any g.), *with tied g.* बद्धपरिकरः, D. ; (7) मञ्जली (= man's g.).

GIRL : (1) बाला ; (2) बालिका ; (3) कन्या (= unmarried g. : and gen. with ref. to the parents) ; (4) कुमारी (= a virgin) ; (5) वासू (only in *addressing* g.s). [भाव., K.

GIRLHOOD : (1) बाल्यं (= childhood : q. v.) ; (2) बालिकावस्था ; (3) बाल-

GIRLISH : I. Pertaining to a girl : expr. by comp. II. Like a girl : expr. by circum., *g. taste* बालानामिव रुचिः.

GIRLISHLY : (1) बालेव ; (2) कुमारीव : V. GIRL, LIKE.

GIRTH : I. Of a horse : (1) वरत्रा ; (2) वर्ध्रं. II. The middle : मध्यं.

GIST : (1) फलितार्थः ; (2) फलार्थः.

GITTERN : V. GUITAR.

GIVE (v. t.) : I. To bestow : (1) ददाति, दत्ते, *or* यच्छति, प्र-, सम्प्र-, सं-, (दा, c. 3. and 1.), *the king g.s him his daughter and lieutenancy* तस्मै राजा ददाति तनयां च यौवराज्यं च, K. S. XXIV. 53. ; *to g. konwledge* विद्यां दातुं, Ki. III. 23. ; (2) वितरति (तॄ, c. 1.) (= to g. freely), *I will g. you eyes* चक्षुस्ते वितराम्यहं, Mah. ; (3) वि-सर्जयति, अति- (सृज्, c. 10.) (= to g. lavishly), *for taking is to g.* आदानं हि विसर्गाय, R. IV. 86. ; (4) प्रतिपादयति (c. of पद्) (rare) (= to make over), *g.ing of things with faith* अर्थानां श्रद्धया प्रतिपादनं, He. ; (5) स्पर्शयति (c. of स्पृश्) (rare) (= to cause to reach), *g.ing millions of kine* गाः कोटिशः स्पर्शयता, R. II. 49. II. To deliver : (1) ददाति, *there are six ways of g.ing and taking* षड्विधो दानादानविधिः, N. S. ; (2) अर्पयति, सम्-, *gave (the child) to the queen to bring up* देव्यै वर्धयेति समर्पितवान्, D. III. To produce : जायते, सं- (जन्, c. 4.) *striking off twenty, it g.s interest*

...... विस्मयापत्त्यं जातं कलान्तरं, Li. IV. To admit : q. v. : परिगृह्णाति (ग्रह्, c. 9.). V. To devote : q. v. : आत्मानं ददाति or समर्पयति, Miscel. : *to g. ear* कर्णं ददाति, Sa. I. ; *to g. advice* उपदेशं ददाति, P. ; *to g. way* (in the streets etc.) वर्त्म ददाति, Ki. XIV. 14. *or* अन्तरं ददाति, Mr. X. ; *to g. order* आज्ञां ददाति, V. p. ; *to give time* कालं ददाति, Kat. ; *g. thanks* धन्यवादं करोति (?).

Give (v. i.) : v. TO YIELD, GIVE WAY.

Give away : प्रददाति : v. TO GIVE (I).

Give back : (1) प्रत्यर्पयति ; (2) प्रतिददाति : v. TO RETURN (I).

Give chase : अनुधावति (धाव्, c. 1.) : v. TO PURSUE.

Give forth : v. TO PUBLISH, TELL.

Give in (v. i.) : v. TO GIVE WAY (I).

Give in (v. t.) : ददाति, प्र- : v. also TO DECLARE.

Give in to : i. e. to adopt : परिगृह्णाति (ग्रह्, c. 9.).

Give off : (1) त्यजति, परि-, (त्यज्, c. 1.) ; (2) जहाति, वि-, (हा, c. 3.) ; etc.

Give out : I. To annouce : ph. *g.ing out that the queen was burnt* देवी दग्धेति वार्तामुत्पाद्य, Ra. IV. ; *should not g. out master's secret acts and counsel* गुह्यं कर्म च मन्त्रञ्च न भर्तुः सम्प्रकाशयेत्, Ka. v. 31. : v. TO DISCLOSE, REVEAL. II. To emit : q. v. III. To yield : q. v.

Give over : I. To abandon : q. v. : परित्यजति. II. To cease, desist : q. v. : निवर्तते (वृत्, c. 1.) (with abl.). III. To despair : q. v.

Give up : I. Lit. : (1) ददाति ; (2) समर्पयति : v. TO GIVE (II and V.). II. To despair : आशां जहाति, त्यजति, etc. (with loc.). III. To cease q. v.

Give way : I. To yield to force : (1) अवसीदति (सद्, c. 1.) (?) ; (2) भज्यते (pass. of भञ्ज्) (= to break). II. Fig. : वशं गच्छति (गम्, c. 1.), *you should not g. way to sorrow* शुचो वशं गन्तुं नार्हसि, R. VIII. 90. III. To comply with : अनुमन्यते (मन्, c. 4.) (with acc.).

GIVEN : in math. : expr. by यदि...... स्यात्.

GIVER (subs.) : (1) दातृ, प्र- (f. त्री), *a g. unasked* अयाचितप्रदाता, Ga. ; (2) -दः or -प्रदः (दा, दं) or -दायिन् (f. नी) in comp., *money-g.* धनदः ; *g.s of fire and water* अग्न्युदकदायिनः, Kat. ; (3) त्यागशालिन् (f. नी) (= a lavish g.), Si.

GIVING (subs.) : (1) दानं (best equiv.) ; (2) प्रदानं, सं- ; (3) प्रतिपादनं ; (4) वितरणं ; (5) विसर्जनं ; (6) निर्वापणं (rare) : v. TO GIVE.

GIVING (adj.) : (1) -दः or -प्रदः (दा, दं), *life-g.* प्राणप्रदः (दा, दं), *strength-g.* बलदः (दा, दं), Bha. ; (2) -दायिन् (f. नी).

GIZZARD : of birds : जठरः (?).

GLACIAL : expr. by comp. : v. GLACIER, ICY.

GLACIER : *संहतहिमक्षेत्रं ; शिलीभूतहिमभूमिः.

GLACIS : *बहिःप्रवणः ; बहिःप्रवणा भूमिः.

GLAD (adj.) : (1) हृष्टः (ष्टा, ष्टं), प्र-, सं-, (best equiv.) ; (2) आनन्दितः (ता, तं) ; (3) सानन्दः (न्दा, न्दं) ; (4) आह्लादितः (ता, तं). *To become g.* : हृष्यति (हृष्, c. 4.) : v. DELIGHTED, TO BE.

GLADDEN : हर्षयति, प्र-, सं-, (c. of हृष्) : v. TO DELIGHT, PLEASE.

GLADE : वनमार्गः or sim. मार्गः (when the sense is clear).

GLADIATOR : असियोधः (?) ; असिमल्लः (?).

GLADIATORIAL : expr. by comp., *g. fight* असियोधयुद्धं (?).

GLADLY : (1) सहर्षं ; (2) साह्लादं ; (3) सानन्दं.

GLADNESS : (1) हर्षः, प्र- ; (2) आनन्दः ; (3) आह्लादः ; (4) हृष्टिः (rare).

GLADSOME : I. Glad : q. v. II. Clearing : expr. by comp., *g. way* आनन्ददिनं.

GLANCE (subs.) : (1) दृष्टिपातः ; (2) कटाक्षः (= sidelong g.), *a g. containing nectar as well as poison* दिग्धोऽमृतेन च विषेण च कटाक्षः, Ma. I. 30. ; (3) अपाङ्गनिक्षेपः (= 2) ; (4) साचि निरीक्षितं and sim. comp.s (= 2).

GLANCE (v.) : I. To cast the eyes rapidly : (1) दृष्टिं क्षिपति (क्षिप्, c.

6.) ; (2) कटाक्षपातं करोति. II. To graze : घर्षति (घृष्, c. 1.). III. To allude : कटाक्षेण वदति (वद्, c. 1.), उक्ति (वच्, c. 1.), etc., Táránáth. IV. To move quickly : स्फुरति (स्फुर्, c. 6.). V. To dart aside : अपात् निष्पतति (पत्, c. 1.).

GLAND : शिरा, (?).

GLANDERS : prob. वमथु., Bha.

GLANDULAR : expr. by comp. *or* by gen.

GLARE (subs.) : perh. तेजस्, *I can not bear the g.* आतपतेजः सोढुं न शक्नोमि : v. also BRIGHTNESS.

GLARE (v.) : I. Lit. : (1) सं-दीप्यते (दीप्, c. 4.) ; (2) वि-द्योतते (द्युत्, c. 1.) ; (3) रोचते (रुच्, c. 1.). II. Fig. : expr. by adj., *where the eye g. on* यत्र संदीप्तचक्षुः पतति.

GLARING : I. Lit. : (1) सं-दीप्तः (प्ता, प्तं), प्र- ; (2) द्योतमः (मी, मं), वि- ; (3) रोचिष्णु (mfn.). II. Very clear : q. v. : सुस्पष्टः (ष्टा, ष्टं).

GLARINGLY : (1) सुस्पष्टं ; (2) परिस्फुटं : v. CLEARLY.

GLASS (subs.) : I. The material : (1) काचः ; (2) स्फटिकः (= crystal.). II. A mirror : q. v. : दर्पणः. III. A g. instrument : perh. काचयन्त्रं : v. TELESCOPE, MICROSCOPE, etc. IV. A drinking g. : चषक (mn.) (= cup). *Wine-g.* : *काचनिर्मितं मद्यपानपात्रं. V. Glassware : *काचपात्राणि (n. pl.).

GLASS (adj.) : (1) by comp., *g.-bottle* काचकूपी ; (2) स्फाटिकः (की, कं) (= crytal ?), *g.-door* स्फाटिकं द्वारं, Mah. II. 47. 11.

GLASS (v.) : I. To see : q. v. : निरीक्षते (ईक्ष्, c. 1.). II. To reflect : [q. v.

GLASS-BLOWER : *काचध्मः ; काचधमकः.

GLASS-CUTTING : *काचपरिष्कारः ; काचतक्षणं.

GLASSFUL (subs.) : expr. by glass, *two g.s* द्वे चषके.

GLASS-WORK : I. The work : काचकर्मन् (n.) (?). II. The place : *काचा-[गारं.

GLASSY : I. Lit. : v. GLASS (adj.). II. Resembling g. : स्फाटिकः (की, कं).

GLAZE (v.) : I. Lit. : *काचयति (nomi.). II. To render smooth : श्लक्ष्णीकरोति. III. To furnish with glass : expr. by circum.

GLAZIER : *काचकारः (= glass-maker); काचसंधाद (m.).

GLEAM (v.) : (1) स्फुरति, वि-, परि-, (स्फुर्, c. 6.); (2) लसति, उत्-, वि-, (लस्, c. 1.); (3) दीप्यते (दीप्, c. 4.) v. TO SHINE.

GLEAM (subs.) : I. Lit. : स्फुरितं; स्फुरणं. II. Brightness, splendour : q. v. : प्रभा. III. Fig., of hope, joy, etc. : not expr., *there is no g. of hope* आशालेशोऽपि नास्ति.

GLEAMING (adj.) : (1) स्फुरत् (f. न्ती), वि-, प्र-, परि-, *g. rays* स्फुरद्रश्मिरोचि-, Ku.; (2) लसत् (f. न्ती), उत्-, वि-, *g. lightning* लसत्तडित्, Ki. XVI. 37.

GLEAN (v.) : (1) सङ्कलयति (कल्, c. 10.); (2) सं-उद्गृह्णाति (ग्रह्, c. 9.).

GLEANER : (1) संकलयितृ (f. त्री); (2) संग्रहीतृ (f. त्री). [(2) संग्रहः.

GLEANING : I. Lit. : उञ्छः (rare), M. IV. 5. II. In gen. : (1) संकलनं;

GLEBE : मृत्तिका : v. GROUND, SOIL.

GLEBY : (1) लोष्टमयः (यी, यं) and sim. comp.s.

GLEDE : चिल्लः : v. KITE.

GLEE : हर्षः : v. JOY.

GLEEFUL : प्रहृष्टः (ष्टा, ष्टं) : v. JOYFUL.

GLEN : उपत्यका : v. VALE, VALLEY.

GLIB : I. Slippery : पिच्छिलः (ला, लं). II. Voluble : चपलः (ला, लं).

GLIBLY : द्रुतं *or* क्षिप्रं (= quickly).

GLIBNESS : I. Slipperiness : पिच्छिलता. II. Volubility : चपलता.

GLIDE : I. Of time : याति (या, c. 2.) v. TO GO. II. Of rivers : स्रवति (स्रु, c. 1.) : v. TO FLOW. III. To move on : प्रचलति (चल्, c. 1.).

GLIDE, GLIDING (subs.) : (1) गतिः (= motion); (2) प्रसर्पणं (as of serpent); (3) स्रुतिः (= flow).

GLIMMER (v.) : मन्दं मन्दं ज्वलति (ज्वल्, c. 1.).

GLIMMER (subs.) : (1) मन्दतेजस् (n.); (2) मन्दप्रभा; (3) better by verb.

GLIMMERING (adj.) : मन्दं मन्दं ज्वलत् (f. न्ती) ; मन्दप्रभः (भा, भं) (with faint light), B.

GLIMPSE : (1) चणदृष्टिः (?) ; (2) सुहूर्तदर्शनं. [V. BRIGGT, BRILLIANT.

GLISTEN, GLISTER : द्योतते (द्युत्, c. 1.) : V. TO GLEAM, SHINE. *G.ing* :

GLITTER (v.) : (1) द्योतते, वि- (द्युत्, c. 1.) ; (2) राजते, वि- (राज्, c. 1.) ; (3) भासते, उत्- (भास्, c. 1.) ; (4) भाति, वि- (भा, c. 2.). Ph. *"all that g.s is not gold"* श्वेते श्वेते न माक्षिकं (?), J.

GLITTER (subs.) : (1) औज्ज्वल्यं, Ma. ; (2) द्युतिः ; (3) प्रभा ; (4) तेजस् (n.).

GLITTERING : ज्वलत् (-न्ती), प्र-, *g. energy* ज्वलत्प्रतापः, N. : V. BRIGHT, BRILLIANT.

GLOAT (v.) : तृप्यति, सं-, परि-, (तृप्, c. 4.) (= to be satiate).

GLOBE : I. A sphere : गोलः, *terrestrial g.* पृथिवीगोलः, Su. XIII. 3. II. The earth : q. v. : भूगोलः, *the Meru is in the center of the g.* भूगोलमध्यगो मेरुः, Su.

GLOBULAR : (1) गोलाकारः (रा, रं) ; (2) गोलकाकृति (mfn.), Su. ; etc.

GLOBULE : गुली,-का : V. BALL.

GLOOM : I. Lit. : तिमिरं : V. DARKNESS. II. Fig., cloudiness of mind : निष्प्रभता ; better by adj. निष्प्रभः (भा, भं). III. Sadness, calamity : q. v.

GLOOMILY : I. Dimly : निष्प्रभं. II. Sadly : सविषादं.

GLOOMINESS : निष्प्रभता : V. GLOOM.

GLOOMY : (1) तामसः (सी, सं) V. DARK ; (2) निष्प्रभः (भा, भं) V. DIM ; (3) विषण्ण (f. ण्णा) V. DEJECTED. [dif. V. GLORIFY.

GLORIFICATION : (1) कीर्तनं, सं-, परि- ; (2) आराधनं ; (3) सत्कारः. For

GLORIFY : (1) कीर्तयति, सं-, परि-, (कृत्, c. 10.), *g.ed in heaven* लोकामरगीतकीर्तिं (mfn.), R. VI. 45. V. TO CELEBRATE ; (2) आराधयति (राध्, c. 10.) V. TO ADORE ; (3) सत्करोति V. TO HONOUR.

GLORIOUS : I. Illustrious, famous : q. v. : (1) महायशस् (mfn.) ; (2)

उद्यकीर्ति (mfn.). II. Conferring glory : (1) यशस्य (f. स्या) ; (2) यशस्कर: (री, रं). III. Excellent, great : q. v. : महत् (f. ती). IV. Splendid : q. v. : महोज्ज्वल: (ला, लं), *he was a g. collection of greatness* स राशिरासीन्महतां महोज्ज्वल:, N.

GLORIOUSLY : (1) महोज्ज्वलं (= splendidly) ; (2) विशिष्टं (= excellently).

GLORY (subs.) : I. Renown : q. v. : (1) कीर्ति: ; (2) यशस् (n.). Ph. : *the g. of your fame* सौभाग्यमात्मयशस:, Sa. VII. II. Honour : q. v. : गौरवं. III. Spendour : q. v. : (1) तेजस् (n.) ; (2) प्रताप:. IV. Pride : q. v. : अभिमान:. V. Praise : expr. by कीर्तयति. VI. An ornament : (1) अलङ्कार: ; (2) रत्नं (= gem) ; (3) तिलक: (rare), *the g. of the race of Raghu* रघुकुलतिलक:, Vi.

GLORY (v.) : I. To rejoice : q. v. : मोदते, प्र-, (मुद्, c. 1.). II. To boast : q. v. : दृप्यति (दृप्, c. 4.).

GLOSS (subs.) : I. Comment, interpretation : (1) टीका ; (2) टिप्पनी ; (3) व्याख्या, *in the g. of the Mimansa styled "light of the glorious commentary"* मीमांसकव्याख्यायां भाष्यरत्नप्रभायां.. II. A specious appearance : बाह्यशोभा.

GLOSS (v.) : टीकां करोति (with gen.) : v. TO EXPLAIN.

GLOSSARY : निघण्टु:, *medical g.* वैद्यकनिघण्टु:.

GLOSSINESS : (1) स्निग्धता ; (2) चिक्कणता ; (3) बाह्यशोभा (in bad sense).

GLOSSY : I. Polished : (1) स्निग्ध (f. ग्धा), *g. black hair* स्निग्धनील: मूर्धजकलाप:, D. ; (2) चिक्कण: (णा, णं). II. In bad sense : बाह्यप्रभ: (भा, भं) (?).

GLOVE (subs.) : *हस्तका ; करच्छद:. *To throw the g.* (fig.) : नियुद्धाय आह्वयते [(ह्वे, c. 1.).

GLOVE (v. t.) : (1) *हस्तकया or करच्छदेन आवृणोति (वृ, c. 5.) ; (2) हस्तकां परि- दधाति (धा, c. 3.).

GLOVER : *हस्तकाकार: ; करच्छदनिर्मातृ (m.).

GLOW (subs.) : I. Heat : q. v. : उत्ताप:. II. Redness : रक्तता.

Glow (v.) : (1) दीप्यते (दीप्, c. 4.) (= to be lighted, inflamed), *g.ed with rage* क्रुद्धोऽदीपि, B. vi. 32. ; (2) ज्वलति (ज्वल्, c. 1.) (= to burn : q. v.).

Glowing (adj.) : I. Lit. : (1) प्रदीप्तः (प्ता, प्तं) ; (2) ज्वलितः (ता, तं). II. With passion etc. : प्रदीप्त (f. प्ता). III. Red : रक्तः (क्ता, क्तं). IV. Brilliant : उज्ज्वलः (ला, लं), *in g. colours* उज्ज्वलवर्णैः.

Glowingly : i. e. in glowing terms : perh. दीप्ताक्षरैः.

Glow-worm : (1) खद्योतः ; (2) ज्योतिरिङ्गः-णः ; (3) प्रभाकीटः.

Gloze : I. Verb : v. TO FLATTER, FAWN. II. Subs. : v. FLATTERY, ADULATION. [cular लाक्षा ; (3) संश्लेषार्थं पिच्छलद्रव्यं, Nil.

Glue (subs.) : (1) वारं-कं, Mah. S. 147. l. ; (2) लाक्षा (?) (comp. verna-

Glue (v.) : वारेण *or* लाक्षया संश्लेषयति (c. of श्लिष्) (?).

Glue-boiler : (1) वारकारः (?) ; (2) लाक्षाकारः (?).

Gluey : v. GLUTINOUS. [tiate : q. v. : सं-तर्पयति (c. of तृप्).

Glut (v. t.) : I. To swallow : q. v. : ग्रसते (ग्रस्, c. 1.). II. To sa-

Glut (subs.) : I. That which is swallowed . ग्रासः. II. Abundance : q. v. : प्राचुर्यं. III. Satiety : q. v. : सौहित्यं, Vi.

Glutinous : (1) पिच्छलः (ला, लं) (?) ; (2) संश्लेषशीलः (ला, लं) (?).

Glutinousness : (1) पिच्छलता (?) ; (2) संश्लेषशीलता (?).

Glutton : (1) औदरिकः ; (2) उदरम्भरिः ; (3) खादनः, Ki.

Gluttonous : (1) औदरिकः (की, कं) ; (2) घस्मरः (रा, रं) ; (3) बह्वाहारप्रियः (या, यं) ; (4) गृध्नः (ध्ना, ध्नं) (= covetous).

Gluttony : (1) औदरिकता ; (2) घस्मरता ; (3) बह्वाहारप्रियता.

Gnarled : ग्रन्थिलः (ला, लं) : v. KNOTTY.

Gnash : *to g. the teeth* दन्तैर् दन्तान् निष्पीडयति (पीड्, c. 10.) *or* दशति, वि-, सं- (दंश्, c. 1.), Mah. II. 43. 12. ; क्ष्वेडति (क्ष्विड्, c. 1.), M. IV. 64.

Gnashing : क्ष्वेडनं, K. b. ; better by verb.

Gnat : (1) मशकः (= mosquito) ; (2) दंशः (a fly).

GNAW : दशति (दंश्, c. 1.) : v. TO BITE.

GNAWING (subs.) · दंश: : v. BITE, STING.

GNOME : I. A fairy : भूतधात्री (?). II. A goblin : भूत·.

GNOMIC,-AL : i. e. sententious : लघु (mfn.). [*सरूपच्छेद: ; कील:.

GNOMON : I. Of a dial : (1) शङ्कु: ; (2) कील: ; (3) मयूख:. II. In geo. :

GNOMONICS : *घटीविद्या.

GNOSTIC : *पण्डिताभिमानिन् (f. नी) ; नोस्टिक:.

GNOSTICISM : *नोस्टिकमतं ; नोस्टिकदर्शनं.

GNU : ऋक्षसारङ्गजातीयोऽश्वाकार: विषाणी जन्तुविशेष: ; prob. ऋक्ष:.

GO : I. In gen. : (1) गच्छति (गम्, c. 1.), *when Keyuraka had gone* गते च केयूरके, K. ; *true and going to* (i. e. reaching) *the heart* यथार्थां हृदयङ्गमा:, Ku. ; *the danger is gone* गतं भयं, V. I. 5. ; *is gone, will not return* गत एव न निवर्तते, Ku. IV. 30. ; *a road going to the Golden City* सुवर्णपुरगामी पन्था:, K. ; *that they should go the way of their husbands* यद्भर्तृगतिर्गन्तव्येति, P. IV. ; *in her absence,* (*it*) *goes to the daughter* तदभावे दुहितृगामि, V. 8. ; (2) याति (या, c. 2.), *and you go to another* (*man*) अपरस्य यासि, Mr. IV. ; *the man will go one month* मासमेकं नरो याति, H. ; *moonlight goes* (*away*) *with the moon* शशिना सह याति कौमुदी, Ku. ; (3) एति (इ, c. 2.), *come, come, let us go* एह्येहि याम:, U. ; (4) व्रजति (व्रज्, c. 1.), *go and conquer the enemies* व्रज जय रिपुलोकं, Ki. II. To sell : expr. by लभते (लभ्, c. 1.) *or* प्राप्नोति (आप्, c. 5.), *eight go for hundred* अष्टौ लभन्ते शतं, Li. III. To fare, turn out : q. v. Ph. : *go in* अभ्यन्तरं प्रविश, Mr. I. ; *he has gone too far* अतिभूमिमयं गत:, K. ; *he is going* (lit. wishes) *to say something* किमप्ययं विवक्षु:, Ku. *or* वक्तुकाम:, Sa. ; (*I am*) *going to ask something* किञ्चित्प्रष्टुमना:, Ku. ; *as the story goes* किल (enclitic) ; *to go for nothing* विफलीभवति.

GO ABOUT : I. To go round : q. v. II. To endeavour : q. v. : perh. गच्छति, याति ; यतते (यत्, c. 1.).

Go AFTER : अनुगच्छति (with acc.) : v. TO FOLLOW.

Go ASTRAY : (1) अपथ्यानं गच्छति etc. Ana. ; (2) उन्मार्गेण गच्छति, याति, etc.

Go AWAY : I. Lit. : (1) अपैति (इ) ; (2) अप-सरति ; (3) अप-क्रामति ; (4) अप-गच्छति ; (5) अप-याति ; (6) अप-सर्पति. II. To vanish : (1) गच्छति ; (2) याति.

Go BACK : (1) प्रति-गच्छति, *you should go back from here after communicating your message to us* अत नः सन्दिश्य प्रतिगन्तुमर्हसि, Sa. IV. ; (2) प्रतियाति, D. II. : v. TO RETURN.

Go BEFORE : पुरोगच्छति, याति, *or* सरति (with gen.).

Go BY : I. Lit. : v. TO PASS BY. II. Fig., to follow : अनु-गच्छति.

Go DOWN : अधो गच्छति : v. TO DESCEND ; TO SINK.

Go FORTH : निष्क्रामति : v. TO GO OUT (I).

Go NEAR : उपगच्छति *or* उपयाति (with acc.) : v. TO APPROACH.

Go OFF : I. To go away : q. v. II. To turn out : q. v. III. To discharge, as a gun : perh. मुच्यते, निर्- (pass. of मुच्).

Go ON : I. In gen. : याति, प्र-, *go on* याहीति, R. vi. 30. ; *go on cattle* यातं गावो यातं, Mr. VI. II. To take place : वर्तते (वृत्, c. 1.).

Go OUT : I. In gen. : (1) निष्क्रामति ; (2) निर्गच्छति ; (3) निर्याति ; (4) निःसरति ; (5) निरेति. II. Of light : (1) निर्वाति (वा, c. 2.), Sa. v. ; (2) शाम्यति, उप-, (शम्, c. 4.) Mu. Ph. : *my life is going out* प्रचलन्ति हि मे प्राणाः, Vi. v.

Go OUT TO MEET *or* RECEIVE : (1) प्रत्युद्गच्छति (गम्), Ku. VII. 52. ; (2) प्रत्युदेति (इ), Ku. v. 31. ; (3) प्रत्युद्याति (या), Vi. VII. ; (4) प्रत्युद्व्रजति (व्रज्).

Go OVER : I. To read : q. v. : वाचयति (c. of वच्). II. To examine : q. v. : परीक्षते (ईक्ष्, c. 1.). III. To change sides : expr. by श्रयति, आ-, सं-, (श्रि, c. 1.), *people being alarmed go o. to enemies* भूतान्युद्विग्नमानानि द्विषतां यान्ति संश्रयं, Ka. XIV. 13. IV. To revolt : q. v.

GO ROUND : (1) परिगच्छति ; (2) पर्येति (इ) ; (3) चङ्क्रमीति (freq. of क्रम्), N. I. 144. ; (4) प्रदक्षिणं करोति or प्रदक्षिणीकरोति (= to g. r. a sacred fire etc, as a sort of reverential salutation), Sa. IV.

GO THROUGH : I. To accomplish, finish : q. v. : समापयति (c. of आप्). II. To suffer, undergo : q. v. : अनुभवति (भू, c. 1.).

GO TO : *go to war* रणं गच्छति, B. p. : v. TO GO (I).

GO TO AND FRO : परि-क्रामति or क्राम्यति (क्रम्, c. 1. and 4.).

GO TOWARDS : अभिमुखं (with gen.) *or* -प्रति (with acc.) गच्छति, व्रजति, etc.

GO UNDER : I. Lit. : अधो गच्छति, याति, etc. II. To be known : q. v. : expr. by प्रथित: (ता, तं).

GO UP TO : (1) अभिगच्छति ; (2) अभियाति ; (3) अभ्येति.

GOAD : (subs.) : (1) प्रतोद: ; (2) अङ्कुश: (for elephants) ; (3) प्राजनं ; (4) सृणि: (= 2) ; (5) (rarely) तोत्त्रं or तोदनं.

GOAD (v.) : I. Lit. : तुदति or तोदयति, प, (तुद्, c. 6. or c. of तुद्), *g.ing speech* वाक्प्रतोद:, Ram. II. Fig. : perh. (1) प्रतोदयति ; (2) प्रचो(चो)दयति (c. of तुद् or चुद्) v. TO DRIVE.

GOAL : I. Lit. : जयभूमि:. II. Fig. : अन्त: : v. END.

GOAT : (1) अज: ; (2) छाग: ; (3) छागल:. *She-g.* : (1) अजा ; (2) छागी. *A flock of g.s* : आजकं. *G. herd* : (1) अजाजीव: ; (2) जाबाल: ; (3) छागपाल:. *G.'s flesh* छागमांसं. *G.'s milk* छागीदुग्धं or छागं दुग्धं, Bha.

GOATISH : expr. by tat. comp. : v. also LUSTFUL, RANK.

GOATISHLY : (1) छागवत् ; (2) अजवत् : v. also LUSTFULLY.

GOAT-SUCKER : पक्षिविशेष: ; *मिथ्योलूक: ; छागचूष:.

GO-BETWEEN : (1) मध्यस्थ: ; (2) मध्यवर्तिन् (m.). *Female g.* : v. PROCURESS.

GOBBET : ग्रास: : v. MOUTHFUL.

GOBBLE : उत्-ग्रसते (ग्रस् c. 1.) : v. TO SWALLOW.

GOBLET : (1) चषक (mn.) v. CUP ; (2) कांस्यं (of Kánsá).

GOBLIN : (1) भूत:, *possessed by g.s* भूताविष्ट: (ष्टा, ष्टं) ; (2) प्रेत: ; (3) पिशाच:.

God : I. A g. : (1) देवः, *(you are) the G. of g.s* देवानामपि देवता, Ku. ; *the earthly g.s (Brahmins)* भूमिदेवाः, Ma. ; (2) देवता (= deity), *town-g.* नगरदेवता, D. II. ; (3) सुरः (as opposed to असुर Titan), *having faith in g.s* सुरेषु श्रद्दधत्, (f. ती), N. ; (4) अमरः (= immortal) ; (5) विबुधः (= wise) ; (6) दिवौकस् (m.) (= residing in heaven) ; (7) लोकपालः (of the quarters), *human g.s* (kings) नरलोकपालाः, R. II. The G. : ईश्वरः, परम-.

God-child : धर्मपुत्रः (f. त्री) ; धर्मसुतः (f. ता).

Goddess : (1) देवी ; (2) भगवती (gen. restricted to दुर्गा).

God-father : धर्मपितृ (m.).

Godhead : I. Divinity : q. v. : देवत्वं,-ता. II. A god : देवता.

Godless : निरीश्वरः (रा, रं), P. p. : v. IMPIOUS.

Godlike : दिव्य (f. व्या) : v. DIVINE.

Godliness : (1) धार्मिकता ; (2) धर्मिष्ठता : v. PIETY.

Godly : (1) धार्मिकः (की, कं) ; (2) धर्मिष्ठ (f. ष्ठा) : v. PIOUS.

God-mother : धर्ममातृ (m.) ; धर्मजननी.

God-send : (1) expr. by देवदत्तः (त्ता, त्तं) ; (2) सौभाग्यं (= good fortune).

God-son : धर्मपुत्रः and sim. comp.s, *g. of Vishvamitra* विश्वामित्रधर्मपुत्रः, B. r. [(गा, गं) in comp., *front-g.* पुरोगः.

Goer : (1) गन्तृ (f. त्री) ; (2) गामिन् or यायिन् (f. नी) or सरः (री, रं) or -गः

Goggle-eyed : लोलनेत्रः (त्रा, त्रं) and sim. comp.s.

Going (subs.) : (1) गमनं, *g. back* प्रतिगमनं, *g. out* निर्गमः-नं, *g. round* परिगमनं, *g. up to* अभिगमनं ; (2) यानं, *g. forth* निर्याणं, *g. away* अपयानं, *g. and coming* यातायातं : v. THE SEVERAL VERBS.

Goitre : (1) गलगण्डः ; (2) गण्डिः ; (3) गण्डुः (rare).

Goitred, Goitrous : गलगण्डिन् (f. नी).

Gold (subs.) : (1) स्वर्णं ; (2) सुवर्णं ; (3) कनकं ; (4) काञ्चनं ; (5) हेमन् ; (6) हिरण्यं ; (rarely) (7) चामीकरं ; (8) जाम्बूनदं ; (9) रुक्मं ; (10) महारजतं.

Gold, of Gold (adj.) : v. **golden.**

Gold-beater : स्वर्णपत्रकार: and sim. comp.s. [sim. comp.s.

Gold-dust : (1) काञ्चनरेणु: ; (2) कनकपराग: ; (3) चामीकरचूर्णं, K. and

Golden : (1) by tat. comp., *g. ornament* कनकभूषणं ; (2) काञ्चन: (नी, नं) ; (3) सौवर्ण (f. र्णी) ; (4) हिरण्मय: (यी, यं) ; (5) स्वर्णमय: (यी, यं) ; (6) हैम: (मी, मं) ; (7) कनकमय: (यी, यं). Ph. : *the g. age* सत्ययुगं.

Gold-finch : सुवर्णसवर्णपक्ष: पक्षिविशेष: ; *स्वर्णपतत्र:.

Gold-fish : *स्वर्णंवर्ण: ; चीनदेशीयमत्स्यविशेष:.

Gold-leaf : (1) स्वर्णपत्रं ; (2) सुवर्णपत्रं ; (3) कनकपत्रं ; etc.

Gold-refiner : स्वर्णशोधक: and sim. comp.s : v. **to refine.**

Gold-smith : (1) स्वर्णकार: ; (2) सुवर्णकार: (rare) ; (3) हेमकार: (rare).

Gold-thread *or* **wire** : (1) कनकसूत्रं ; (2) सुवर्णसूत्रं ; (3) सुवर्णतन्तु:.

Gondola : इटालिदेशीयकेलिनौविशेष: ; *गण्ड:,-नौ:.

Gondolier : *गण्डवाहक: : v. **boatman.**

Gong : (1) कांस्यं ; (2) घनं.

Gonorrhea : मूत्राघात: (gen. term), Bha. ; मूत्रशुक्रं (?), Sr.

Good : I. In ordinary sense : (1) उत्तम: (मा, मं), *the g. things of Camphor island* कर्पूरद्वीपस्योत्तमानि वस्तूनि, H. iv. ; *his best painter* निजचित्रकरोत्तम:, K. s. 57. 123. ; *the best of men (God)* पुरुषोत्तम: ; (2) उत्कृष्ट: (ष्टा, ष्टं) (= excellent), *g., bad, and middling* उत्कृष्टापकृष्टमध्यम-, K. b. ; (3) विशिष्ट: (ष्टा, ष्टं) (= very g.), *very g. cloth* विशिष्टवस्त्रं, P. iii. 9. ; (4) सु *or* सत् prefixed : *a g. poet* सुकवि:, Bho. ; *a g. physician* सुचिकित्सक: ; *a g. judge* सद्विचारक: ; *g. man* सज्जन: *or* sim. सत्, U. ; *of g. appearance* सुरूप: (पा, पं) ; (5) गुणवत् (f. ती) (having g. qualities), *g. soil* गुणवती भूमि:, Ka. ; *g. wife* गुणवती भार्या ; (6) दर्शनीय: (या, यं) *or* दृश्य (f. श्या) (g. to see), *other g. games* क्रीडान्तराणि दर्शनीयानि, D. II. Suited, adopted : हित: (ता, तं), *g. for cattle* गोहित: (ता, तं), Ka. iv. 51. ; *sour gruel is not g. in fever* यवागूर्न हिता ज्वरे,

Bha. III. Proper, right : q. v. : उचित: (ता, तं), N. III. 9. IV. Considerable : सु-, *for a g. while* सुचिरं, K. ; *g. many days* सुबहून्दिवसान्, C. VIII. ; *a g. number of* सुबहु (mfn.). V. Auspicious : q. v. : शुभ: (भा, भं). Ph. : *g. fellow* भद्र: *or* भद्रमुख: ; *g.-for-nothing* अकर्मण्य (f. ण्या.) *or* sometimes by अ- in comp., *a field g.* अक्षेत्र, M. ; *a g. deal* (adv.) विशेषेण ; *be so g. as, be g. enough* अनुग्रहपूर्वकं ; *this is a g. day to me* अयं मे सुदिवस:, U. II. 1. [*N. B.* note सुदिवस:, सुप्रभातं, etc. are not used in the English sense for which use कुशलं ते, कुशलं भवत:, etc. *or* स्वागतं to a visitor] ; *as g. as* (i. e. in effect) वस्तुत:.

GOOD (subs.) : I. Advantage : (1) उपकार: (= benefit), *I will do g. to this man* उपकारं करोम्यस्य, Ka. IX. 11. ; (2) हितं (= welfare), *for the g. of the people* प्रकृतिहिताय, Sa. VII. *For the g. of* may be expr. by -अर्थं *or* अर्थे in comp. : V. FOR THE SAKE OF. II. As opposed to evil : (1) शुभं, *this is g., this is not g.* शुभमिदमशुभमिदं, K. ; (2) कल्याणं ; (3) कुशलं ; (4) मङ्गलं ; (5) श्रेयस् (= well-being) ; (6) क्षेमं (= 5), *in g.-conferring work* क्षेमङ्करेऽर्थे, B. XII. 6. III. In pl., = property : q. v. : सम्पत्ति:. Ph. : *for g.* expr. by circum., *slept for g.* अप्रबोधाय सुष्वाप, R. [g., admirable).

GOOD (as interj.) : (1) बाढं (as an assent) V. YES ; (2) साधु (= very

GOOD, TO DO : (1) उप-करोति *or* -कुरुते (कृ, c. 8.) (with gen.), Ki. VII. 28. ; (2) प्रियं करोति (with gen.), V. v.

GOOD, TO MAKE : V. TO MAKE GOOD.

GOOD-BREEDING : (1) भद्रता ; (2) साधुता (= gentlemanliness), D. II.

GOOD-FELLOWSHIP : I. Lit. : सत्सङ्ग:. II. Pleasant company : q. v.

GOOD-FRIDAY : *शुभशुक्रवार: *or* -वासर:.

GOOD-HUMOUR : (1) प्रफुल्लचित्तता ; (2) प्रसन्नमनस्कता.

GOOD-HUMOURED : (1) प्रफुल्लचित्त: (त्ता, त्तं) ; (2) प्रफुल्लमनस्क: (स्का, स्कं).

GOOD-HUMOUREDLY : (1) प्रफुल्लचित्तेन ; (2) प्रसन्नमनसा.

GOOD-LOOKING : (1) प्रियदर्शन: (ना, नं) ; (2) सुदृश्य: (श्या, श्यं) ; (3) सुदर्शन: (ना, नं) ; (4) दर्शनीय: (या, यं) *or* दृश्य (f. श्या), *very g.* विशेषदृश्य: (श्या, श्यं), R. VI. 31.

GOODLY : V. HANDSOME, PLEASANT.

GOODMAN : I. In gen. : भद्र:. II. Husband : आर्यपुत्र:.

GOOD-NATURE : (1) सौजन्यं *or* सुजनता,-त्वं, *this is your g.* सौजन्यमेतद्धि वो, Vi. V. 62. ; (2) सद्भाव: (rare), *but then by that additional (act) which shewed (her) g.* सद्भावोऽस्तु तेनापरेण दर्शितसद्भावेन, K. ; (3) भद्रता (= good-breeding). [GENTLEMANLY.

GOOD-NATURED : (1) सौजन्यवत् (f. ती) ; (2) सद्भावशालिन् (f. नी) : V. also

GOOD-NATUREDLY : (1) सौजन्येन ; (2) सद्भावत: : V. also KINDLY.

GOODNESS : I. Excellence : (1) उत्तमता (rare) ; (2) उत्कृष्टता ; (3) विशिष्टता ; (4) गुणवत्ता : V. GOOD. II. Good-nature : q. v.

GOOD-TEMPERED : (1) अचण्डप्रकृति (mfn.) ; (2) मृदुप्रकृति (mfn.) (= mild).

GOOD-WILL : I. Benevolence : (1) दया (= kindness) ; (2) अनुग्रह: (= favour). II. Of any business : प्रतिष्ठा (??).

GOODS : V. GOOD (subs.) (III). *G.-wagon* *भारयानं.

GOOSE : I. Lit. : (1) हंस: (f. सी) ; (2) राजहंस: (f. सी) ; (3) चक्राङ्ग: (f. ङ्गी) (rare). *G.-quill* : हंसपत्रं (??). *The ruddy g.* : चक्रवाक:. *The striped g.* : धार्तराष्ट्र:. II. Fig. : V. FOOL.

GOOSEBERRY : फलविशेष: ; *तेपारि. *G.-fool* : *तेपारीयक्षीरं.

GO-OUT : निर्गम: ; अवनिर्गम:.

GORDIAN : Ph. : *g. knot* अमोच्यबन्ध:, *to cut it* अमोच्यबन्धं छिनत्ति.

GORE (subs.) : I. Blood : q. v. : रक्तपिण्ड: ; रक्तगुल्म:. II. A piece of cloth : योजितपटखण्ड:.

GORE (v. t.) : विध्यति (व्यध्, c. 4.) : V. TO STAB, PIERCE.

GORGE (subs.) : I. The throat : q. v. : कण्ठ:. II. A defile, pass : *the Krauncha g.* क्रौञ्चरन्ध्रं, Me.

Gorge (v.) : I. To swallow : उद्ग्रसते (ग्रस्, c. 1.). II. To satiate, fill : q. v. : (कुक्षिं) पूरयति, परि-, (पूर्, c. 10.).

Gorgeous : (1) विचित्र: (त्रा, त्रं), *with a g. canopy* वितानेन विचित्रेण, Mah. I. 183. 17. ; (2) उज्ज्वल: (ला, लं), *wearing a g. dress* उज्ज्वलवेशधारिन् (f. णी), Mr. IX. ; (3) शोभन: (ना, नं) (= beautiful).

Gorgeously : expr. by adj., *g. dressed* उज्ज्वलवेशभृत् (mfn.).

Gorgeousness : (1) विचित्रता ; (2) औज्ज्वल्यं ; (3) शोभा.

Gorget : गलत्राणं, कण्ठकञ्चुक:, and sim. comp.s (?).

Gorgon : I. Subs. : गार्गी (?). II. Adj. : राक्षस: (सी, सं).

Gormandize : कुक्षिं परिपूरयित्वा खादति (खाद्, c. 1.) ; अत्याहारं करोति.

Gormandizer, **Gormand** : v. GOURMAND.

Gorse : पीतपुष्प: कण्टकिगुल्मविशेष:. [रक्तप्रिय: (या, यं).

Gory : I. Blood-stained : q. v. : रक्ताक्त (f. क्ता). II. Murderous :

Goshawk : श्येनभेद:. [शिशव: परासव:, N.

Gosling : (1) हंसशाव:,-क: ; (2) हंसशिशु:, *as your g.s will be dead* यतस्ते

Gospel : *सुवृत्तं. *To preach the g.* *ख्रष्टधर्मं प्रवक्ति.

Gossamer : ब्रह्मसूत्रं (after Assamese).

Gossip (subs.) : I. A talkative person : (1) जल्पाक: ; (2) वावदूक: ; (3) प्रलापिन् (m.). II. Idle talk : (1) जल्पितं ; (2) प्रलाप: : v. also RUMOUR. [also TO CONVERSE.

Gossip (v.) : (1) जल्पति (जल्प्, c. 1.) (?) ; (2) प्रलपति (लप्, c. 1.) (?) : v.

Gossiping (adj.) : जल्पाक: (की, कं) : v. BABBLING.

Goth : *गोथ:. *G.ic* : *गोथीय: (या, यं).

Gouge (v.) : उत्पाटयति (c. of पट्) ; उद्धरति (हृ, c. 1.), D.

Gourd : no gen. term : (1) रक्तकुष्माण्ड: (= pumpkin g.) ; (2) अलाबु:, बू- (= bottle g.) ; (3) श्वेतकुष्माण्ड: (= chál kumra) ; etc.

Gourmand : (1) औदरिक: ; (2) उदरम्भरि: ; (3) घस्मर:.

Gout : सन्धिगतो वात:, Bha., *g. in the stomach* पक्वाशयगतो वात:, Bha.

GOUTY : वातरोगिन् (f. णी) (gen. term) ; सन्धिवातकिन् (f. नी) (?).

GOVERN : I. As a country : (1) शास्ति, प्र-, अनु- (शास्, c. 2.), *g. the world* शाधि पृथ्वीं, B. III. 53. ; (2) पालयति, परि- (पाल्, c. 10.) (= to protect ; not to regulate), *let kings g. the earth always standing by virtue* राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्वदा, Ma. x. ; (3) by subs. प्रभुः, ईश्वरः, etc. v. LORD, MASTER. II. To control : q. v. : नियच्छति (यम्, c. 1.). III. In gram. : expr. by संबध्यते (pass. of बन्ध्,) *or* अन्वीयते (pass. of इ) (= to agree : with ins.), Da. ; *or* by कर्मन् (n.) (= accusative).

GOVERNANCE : शासनं : v. GOVERNMENT (I).

GOVERNESS : I. Lit. : शासित्री. II. An instructress : q. v. : perh. [शासित्री, अनु-.

GOVERNMENT : The act : (1) शासनं, प्र-, अनु-, *good g.* सुशासनं ; (2) परिपालनं (= protection), *g. of people* प्रजानां परिपालनं, M. II. Supreme power : (1) राज्यं v. KINGDOM ; (2) प्रभुत्वं v. SUPREMACY. III. Form of g. : तन्त्रं (?). IV. The ruling power : (1) राजन् (m.) (= monarch : q. v.) ; (2) प्रभवः (m. pl.) (= masters). V. A state : राष्ट्रं, *hearing that the g. was thoroughly occupied by the sons of Samhára-varman* संहारवर्मपुत्रैः सुतैर्व्याप्तं राष्ट्रमाकर्ण्य, D. III.

GOVERNOR : I. Ruler : (1) शासकः ; (2) शासितृ (m.) ; (3) प्रभुः v. MASTER, LORD. II. Of a province : (1) अधिपतिः ; (2) भोगपतिः, *was made g. of the town called Virapura* वीरपुरनाम्नि नगरे भोगपतिः कृतः, H. ; (3) देशाध्यक्षः, V. s. III. An instructor : q. v. : शासकः *or* शासितृ (m.), *the god Siva is my g.* भगवानीशो हि मे शासिता, Vi. II. 27.

GOVERNORSHIP : (1) आधिपत्यं ; (2) भोगपतित्वं ; (3) देशाध्यक्षता.

GOWN : I. For women : शाटी (?). II. Of scholars etc. : *गौणं. III. A dressing-g. : q. v.

GOWNSMAN : *गौणभृत् (m.), गौणधारिन् (m.), etc.

GRACE (subs.) : I. Favour : q. v. : प्रसादः, *she obtaining the g. of the*

gods प्रसादमासाद्य सुरैः कृतं सा, N. xiv. 8. II. Beauty : q. v. : लावण्यं. III. Good quality : गुणः. IV. Ornament : q. v. : भूषणं, *these various (actions) became their g.s* इति विविधमियाय तासु भूषां, Ki. x. 59. V. As a title : देवः (for dukes), भगवत् (m.) (for archbishops). VI. A goddess : अप्सरस् (f.). VII. A prayer before or after meal : *to say g.* *ईश्वरस्य प्रसादं कीर्तयति *or* प्रसादनां आद्रियते (दृ, c. 4.), N. xiv. 1.

GRACE (v.) : I. To adorn, decorate : q. v. : भूषयति, *chaste knowledge graces flesh* शुचि भूषयति श्रुतं वपुः, Ki. ii. 32. II. To honour : q. v. : सम्मानयति (c. of मन्).

GRACEFUL : (1) लावण्यवत् (f. ती) (= pretty) ; (2) शोभनः (ना, नं) (= fine) ; (3) रमणीयः (या, यं) (= lovely, pleasant).

GRACEFULLY : (1) शोभनं v. BEAUTIFULLY ; (2) मधुरं v. SWEETLY.

GRACEFULNESS : (1) चारुता v. BEAUTY ; (2) माधुर्यं v. SWEETNESS.

GRACELESS : नष्टः (ष्टा, ष्टं) : v. DEPRAVED, CORRUPT.

GRACIOUS : I. Merciful : q. v. : (1) प्रसन्नः (न्ना, न्नं) ; (2) दयामयः (यी, यं). *To be g.* : प्रसीदति (सद्, c. 1.). II. Excellent : q. v. : विशिष्टः (ष्टा, ष्टं). III. Beautiful : q. v.

GRACIOUSLY : (1) सानुग्रहं (= favourably) ; (2) सदयं v. KINDLY.

GRACIOUSNESS : (1) प्रसन्नता ; (2) दया v. KINDNESS ; (3) औदार्यं v. LIBERALITY.

GRADATION : v. GRADE, DEGREE. In music : आरोहावरोहः (?), M. D.

GRADE : (1) श्रेणिः (= class) ; (2) प्रकारः (= kind) ; (3) पदं (= position). Ph. : *g.d service* *श्रेणिबद्धा वृत्तिः.

GRADIENT : I. Moving : चलत् (f. न्ती). II. Inclined : प्रवणः (णा, णं) (?), *a g.* प्रवणभूमिः (?).

GRADUAL : (1) क्रमिकः (की, कं), आनु- ; (2) अल्पाल्प- in comp., *g. decrease* [अल्पाल्पह्रासः, V. p. ; (3) by adv.

GRADUALLY : (1) क्रमशः, *a pot is g. filled* क्रमशः पूर्यते घटः, H. ; (2) क्रमे क्रमे ; (3) अनुक्रमेण ; (4) अल्पाल्पशः (= little by l.) ; (5) शनैः शनैः (= slowly).

Graduate (subs.) : *उपाधिधारिन् (f. णी) ; उपाधिग्राहक (f. हिका).

Graduate (v.) : *to g. in a university* *विश्वविद्यालयस्योपाधिं गृह्णाति (ग्रह्, c. 9.) ; *g. scale* *अङ्कितपादा पद्धतिः.

Graduation : expr. by verb : v. TO GRADUATE.

Graft (subs.) : भिन्नवृक्षे निधानाय वृक्षपल्लवः *or* कलमः (?).

Graft (v.) : I. Lit. : निदधाति (धा, c. 3.) (?). II. Fig. : निदधाति.

Grafter : सङ्करफलोत्पादकः (?).

Grain (subs.) : I. Corn : धान्यं, *small g.* (= millet : q. v.) क्षुद्रधान्यं. II. Seed : q. v. : बीजं. III. A small particle : कणः. IV. Of the veins of wood : *against the g.* प्रतिलोमं. V. A weight : expr. by रक्तिका (= $1\frac{7}{8}$ g.). Ph. *in g.* i. e. deeply seated अस्थिगतः (ता, तं) (?).

Grain (v.) : I. To dye : दृढं रञ्जयति (c. of रञ्ज्). II. To form into g.s : कणमयं (f. यीं) करोति (?).

Grainy : धान्यमयः (यी, यं) and sim. comp.s.

Graminivorous : (1) तृणजम्भ (f. म्भा) ; (2) शष्पभोजिन् (f. नी) ; (3) घासादः (दा, दं) and sim. comp.s.

Grammar : (1) व्याकरणं ; (2) शब्दविद्या (rare), D. *A master of the rules of g.* : शब्दशासनविद् (mfn.), Si. XIV. 24. [(rare).

Grammarian : (1) वैयाकरणः, *a mere g.* केवलवै-, S. k. ; (2) शब्दशास्त्रज्ञः

Grammatical : I Lit. : by comp. II. According to the rules of grammar : *not g.* व्याकरणलक्षणहीनः (ना, नं), Kav. *or* च्युतसंस्कारः (रा, रं), Sah.

Grammatically : (1) व्याकरणानुसारेण ; (2) by adj.

Grampus : मत्स्यविशेषः.

Granary : (1) कुसूलः ; (2) धान्यकोष्ठः-कः ; (3) मरारः (rare).

Grand : I. Great : q. v. : महत् (f. ती). II. Chief : q. v. : प्रधानः (ना, नं). III. Lofty, dignified : q. v. : तेजस्विन् (f. नी)

Grand-child ; v. GRANDSON, GRAND-DAUGHTER.

Grand-daughter : (1) पौत्री (= son's d.) ; (2) दौहित्री (= daughter's d.) ; (3) नप्त्री. *Great-g.* : प्रपौत्री, etc.

Grandee : महाजन: (?) : v. noble.

Grandeur : I. Greatness : q. v. : महत्त्वं. II. Nobleness, majesty : q. v. : माहात्म्यं. III. Loftiness, impressiveness : q. v. : तेजस्विता.

Grand-father : (1) पितामह: (= paternal) ; (2) मातामह: (maternal). *Great-g.* : प्रपितामह: (p.) ; प्रमातामह: (m.). *Great great g.* वृद्धप्रपितामह:, etc.

Grandiloquence : (1) अतिशयोक्ति: ; (2) उच्चवाद:.

Grandiloquent, Grandiloquous : (1) उच्चवादिन् (f. नी) ; (2) अभिसार: (रा, रं) (in bad sense), Si. ; (3) वाक्शूर:, M. n. [better by adj.

Grandly : (1) उज्ज्वलं (= splendidly) ; (2) विशिष्टं (= excellently) ; (2)

Grand-mother : (1) पितामही (paternal) ; (2) मातामही (maternal). *Great g.* : प्रपितामही, etc. *Great g. g.* : वृद्धप्रपितामही, etc.

Grandson : (1) पौत्र: (son's son) ; (2) दौहित्र: (daughter's s.) ; (3) नप्तृ (m.). *Great-g.* : प्रपौत्र:, etc.

Grange : I. Granary : q. v. II. Farm : क्षेत्रं.

Granite : *ग्रन्थिक:, *red g.* *रक्तग्रन्थिक:.

Granivorous : धान्यभुज् (mfn.) ; धान्याद: (दा, दं) ; etc.

Grant (subs.) : (1) दानं, प्र-, *g. of a village* ग्रामदानं, He. ; (2) शासनं (= edict : of royal g.), *with g.s attested with his own signature* स्वहस्तकृतचिह्नशासन:, Si. xiv. 36.

Grant (v. t.) : I. To give : q. v. : (1) ददाति *or* दत्ते (दा, c. 3.), *what does not God g.* (*when*) *gracious* किं न ददाति भगवान् प्रसन्न:, Ve. ; (2) वितरति (तॄ, c. 1.), *God, g. me whatever is good* तस्मै भद्रं भद्रं वितर भगवन्, Ma. i. 4. ; *to whom excessive powers had been g.ed* वितीर्णवीर्यातिशयात्, Si. i. 71. Ph. : *to g. a request* प्रार्थितं *or* कामं ददाति, V. p. *or* अभिलाषं पूरयति. II. To concede : (1) स्वीकरोति (= to admit : q.

v.) ; (2) by चय or चयी (= g.ed), *g.ed the arrow was discharged by him for me* चयी शरस्तेन मदर्थमुज्झितः, Ki. xiv. 17. ; (3) by imper., *I g. he is wholly so* तथाविधस्तावदशेषमस्तु सः, Ku.

Grantee : (1) दानग्रहीतृ (f. त्री) ; (2) प्रतिग्रहीतृ (f. त्री), He.

Grantor : (1) दानकर्तृ (f. र्त्री) ; (2) दातृ (f. त्री) v. giver.

Granular : (1) कणमयः (या, यं) (?) ; (2) कणपूर्ण (f. र्णा) (?).

Grape : द्राक्षा, *mountain-g.* पर्वतजा द्राक्षा ; *g. without stone or seedless g.* फलोजा द्राक्षा ; *large g.* गोस्तनी द्राक्षा, Bha. *N. B.* These words are often applied to *raisins*, Bha. : for distinction, add आमा *or* पक्वा.

Graphic,-al : (1) विचित्रः (त्रा, त्रं) (= picturesque) ; (2) सुस्पष्टः (ष्टा, ष्टं) (= very clear) ; (3) अर्थवत् (f. ती) (= significant).

Graphically : expr. by adj.

Grapnel : I. Properly : क्षुद्रलङ्गरः. II. In gen. : आकर्षणी (?).

Grapple (v.) : I. Lit. : गृह्णाति (ग्रह्, c. 9.), *g.d the arms of Siva* शिवस्य भुजद्वयं जग्राह, M. n. : v. to seize. II. To comprehend : q. v. : गृह्णाति. [आकर्षणी (?).

Grapple, Grappling (subs.) : I. Seizure : q. v. : ग्रहणं. II. A hook : Grappling-irons : लौहाकर्षणी (?).

Grapy : I. Lit. : by comp. II. Like grape : द्राक्षाभः (भा, भं).

Grasp (v.) : I. To catch : q. v. : गृह्णाति (ग्रह्, c. 9.). II. To comprehend : q. v. : गृह्णाति. *G. at* : i. e. aspire to : q. v. : ईप्सति (desi. of आप्).

Grasp (subs.) : I. Lit. : ग्रहः,-णं, *he has fallen in my g.* सोऽयं मद्भुजपञ्जरे निपतितः, Ve. iii. ; *embraced with a firm g.* निष्पिष्य परिरभ्य वक्षसा, Ki. xviii. 13. ; *by their g.ing of each other* तयोर्भुजविनिष्पेषात्, Mah. iii. 39. 60. II. Mental : v. capacity, comprehension.

Grasping (adj.) : गृध्नु (mfn.) : v. covetous.

Graspingly : expr. by adj., *un-g.* अगृध्नुः, R. : v. also covetously.

Graspingness : गृध्नुता : v. covetousness.

Grass : तृणं. *Young g.* : (1) बालतृणं ; (2) शष्पं ; (3) शादः. *Meadow g.* : (1) घासः ; (2) यवसः. *The 'Sacrificial g.'* : (1) कुश (mn.) ; (2) दर्भः. *The Dub g.* : दूर्वा. [षा), Ki. x. 33.

Grass-green : (1) शाद्वल: (ला, लं) ; (2) शादहरित: (ता, तं) ; (3) नवतृण (f.

Grass-hopper : (1) शलभः ; (2) पतङ्गः.

Grassy : I. Lit. : (1) बहुतृण (f. णा) ; (2) तृणावृतः (ता, तं) ; and sim. comp.s. II. Green . q. v. [= fireplace.

Grate (subs.) : no equiv. : *लौहयोगः. लौहचुल्ली might be used for g.

Grate (v.) : I. To furnish with g.s : *लौहयोगान्वितं (f. तां) करोति ; लौहदण्डैः दृढीकरोति. II. To rub. : q. v. : घर्षति (घृष्, c. 1.). III. To vex, irritate : q. v.

Grateful : I. Pleasant : q. v. : रम्य (f. म्या). II. Thankful : (1) कृतज्ञ (f. ज्ञा) ; (2) कृतवेदिन् (f. नी), *and who is not g.* यश्च कृतं न वेत्ति, H.

Gratefully : I. Pleasantly : q. v. II. Thankfully : कृतज्ञतया.

Gratefulness : I. Gratitude : q. v. II. Pleasantness : q. v. : रम्यता.

Grater : घर्षणी (?) ; घर्षणयन्त्रं) (?).

Gratification : I. The act : (1) तोषणं, सं-, परि- ; (2) तर्पणं, परि-, (rare). II. Pleasure, delight : q. v. : (1) सन्तोषः ; (2) परितोषः ; (3) तुष्टिः, *receiving g. at night* तुष्टिमुपेयुषां निशि, N. xvi. iii. III. Reward : q. v. : पारितोषिकं.

Gratify : तोषयति, सं-, परि-, (c. of तुष्), *you will g. him and return quick* तं सन्तोष्य सत्वरमागमिष्यसि, H. ; *the killer of Vritra was g.ed with his excessive strength* तुतोष वीर्यातिशयेन वृत्रहा, R. iii. 62. : v. to please, satisfy.

Grating (adj.) : कर्कश: (शा, शं), *g. to the ear* कर्णकर्कश: (शा, शं), N. xvii. 25. [Grate : q. v.

Grating (subs.) : I. Rubbing : सङ्घर्षणं, *g. of teeth* दन्तसङ्घर्षणं. II.

GRATINGLY : कर्कशं : v. HARSHLY.

GRATIS : विना मूल्येन ; स्वतः (= naturally).

GRATITUDE : (1) कृतज्ञता ; (2) कृतवेदिता.

GRATUITOUS : I. Given without recompense : expr. by adv. II. Without good ground : अमूलकः (का, कं).

GRATUITOUSLY : (1) विना मूल्येन ; (2) स्वतः (= naturally : q. v.).

GRATUITY : दानं : v. PRESENT, GIFT.

GRATULATE, GRATULATION, GRATULATORY : v. CONGRATULATE, CONGRATULATION, CONGRATULATORY.

GRAVE (adj.) : I. Heavy : q. v. : गुरु (f. र्वी). II. Important . q. v. : गुरु (f. र्वी). III. Solemn : (1) गभी(म्भी)रः (रा, रं) (= deep) ; (2) धीरः (रा, रं) (= steady). IV. Of sound : (1) गभी(म्भी)रः (रा, रं) ; (2) मन्द्र (f. न्द्रा) ; (3) धीरः (रा, रं) ; (4) घनः (ना, नं).

GRAVE (subs.) : I. Lit. : अवखातं (?). II. Tomb : q. v. : समाधिः. III. Death, end : q. v. : अन्तः.

GRAVE-CLOTHES : प्रेतवासस् (n.), *covering the emperor with g.* महाराजं वाससा समाच्छाद्य, Ram. II. 83. 15.

GRAVE-DIGGER : अवखातखनकः (?).

GRAVE-STONE : निधानोपलः (?) ; निधानप्रस्तरः (?).

GRAVE-YARD : प्रेतवनं : v. CEMETERY.

GRAVE (v.) : मुद्रयति (मुद्र्, c. 10.) : v. TO ENGRAVE.

GRAVEL (subs.) : शर्करा (= both the earth and the disease).

GRAVER (v.) : I. Lit. : शर्करावृतं (f. तां) *or* शर्कराच्छन्नं (f. न्नां) करोति. II. Fig. : v. TO ENTANGLE, EMBARASS.

GRAVELLY : (1) शर्करावत् (f. ती) ; (2) शार्करिकः (की, कं).

GRAVELY : (1) गम्भीरं ; (2) धीरं : v. GRAVE (adj.).

GRAVENESS : v. GRAVITY.

GRAVITATE : आकृष्यते (pass. of कृष्), *g.s* (lit. is drawn) *towards it accor-*

ding to the law of g.ion (lit. by its force) आकृष्यते स्वाभिमुखं स्वशक्त्या, Go. III. 5.

GRAVITATION : आकर्षणं. *Law of g.* : आकर्षणशक्तिः.

GRAVITY : I. Heaviness : गुरुत्वं, *specific g.* विशेषगुरुत्वं. II. Weight, importance : q. v. : गुरुत्वं. III. Solemnity : (1) गाम्भीर्यं ; (2) धैर्यं (= steadiness). IV. Of sound : (1) गाम्भीर्यं ; (2) मन्द्रता.

GRAVY : सिद्धमांसरसः, Bha.

GRAY (adj.) : (1) पाण्डु (mfn.) (= pale white), *covered with ash-g. hair* भस्मपाण्डुरोमाश्लिष्टः (ष्टा, ष्टं), K. ; (2) धवलः (ला, लं) (=foodhite : q. v.), *g. old age* धवला जरा, K. ; (3) धूम्र (f. म्रा) (= smoky drg ..), *g.-eyed* धूम्राक्ष (f. क्षी), Ram. ; (4) पलितः (ता, तं) (of the head and of old men), *a man is not old because his head is g.* न तेन स्थविरो भवति येनास्य पलितं शिरः, Mah. ; *gray for nothing* वृथापलितः, Si. ; *not by g. (hairs)* न पलितैः, Mah. [expr. by white, *g. horse* श्वेताश्वः.

GRAY (subs.) : I. The color : v. GRAY (adj.). II. A g. animal :

GRAYISH : (1) पाण्डु (mfn.) (?) ; (2) पाण्डुरः (रा, रं).

GRAYNESS : पलितं : v. GRAY (4).

GRAZE (v.) : I. To feed on : चरति, (चर्, c. 1.), *for g.ing at a distance* दूरे चराय, Pa. ; *g. grass* तृणं चरन्ति, Pa. II. To feed : चारयति, सं- प्र-, (c. of चर्), *to g. calves* वत्सांश्चारयति, V. p. III. To touch slightly : घर्षति (घृष्, c. 1.).

GRAZER : तृणचारिन् (f. णी), Pa.

GRAZIER : चारकः, N. s. *Cattle-g.* : गोचारकः.

GRAZING (subs.) : I. The act : (1) चरणं ; (2) प्रचारः. II. G. land : (1) प्रचारभूमिः, V. p. com. ; (2) गोचरः (for kine), Ki. III. Rubbing : आ-घर्षणं.

GREASE (subs.) : (1) वसा ; (2) वपा ; (3) मेदस् (n.). [bribe : q. v.

GREASE (v.) : I. Lit. : वसया स्निग्धीकरोति : v. also TO SMEAR. II. To

GREASILY : I. Lit. : चिक्कणं. II. Grossly : अश्लीलं. [q. v. : चिक्कण: (णा, णं).

GREASY : I. Oily : वसाप्लुत: (ता, तं) (after घृतप्लुत: of N.). II. Smooth :

GREAT : (1) महत् (f. ती) : in most senses : (a) of size : *a g. forest* महावनं, Mu. : v. LARGE. (b) of quantity : *g. collection* महानिचय:, Ki. ; *a g. crowd* महाजनसमूह:, Mu. (c) of weight : *g. news* महती वार्त्ता, H. ; *for g. result* महते फलाय, Ki. : v. IMPORTANT. (d) eminent, noble : *of the g.* महतां, Ki. ; *g. man* महाजन:, Mah. ; *g.-minded* महात्मन् (mfn.), K. : v. PRINCIPAL, CHIEF. (e) of degree etc. : *a g. while* महान् क[illegible] K. ; *g. effort* महान् यत्न:, R. ; *g. sinner* महापातकिन्, Vi. ; *of g*[illegible] महार्ह (f. र्हा), Ku. ; *g. interval* महदन्तरं, P. ; (2) सु (= good) or अति (= very) prefixed (to intensify the meaning) : *to a g. distance* सुदूरं, K. ; *g. many* सुबहु (mfn.), K. ; *to a g. degree* अत्यर्थं, Ki. ; (3) अधिक: (का, कं) (when there is comparison), *the g. animals did not harass the little* जनं न सत्त्वेष्वधिको बबाधे, R. II. 14. ; *g.er devotion* अधिका भक्ति:, K. v. MORE.

GREAT-COAT : no equiv. : *महापोत:.

GREAT-GRANDFATHER etc. : v. GRANDFATHER etc.

GREATEST : in degree : परम: (मा, मं) : v. EXTREME. *In the g. degree* : परं : v. EXTREMELY.

GREATLY : I. Much, exceedingly . q. v. : (1) अति- or सु- in comp. ; (2) अतिशयं ; (3) भृशं. *Very g.* : सुतरां, नितरां, or अतितरां, *his love was very g. implanted* सुतरामारोपितप्रीतिरभवत्, K. II. Nobly : q. v. : by adj.

GREATNESS : (1) महत्त्वं, *for accession of g.* महत्त्वयोगाय, Ki, III. 23. ; (2) महिमन् (m.), *the chief of devotees domineers with her g.* प्रभवति हि महिम्ना स्वेन योगीश्वरीयं, Ma. X. 8. V. EMINENCE, GRANDEUR ; (3) गुरुत्वं (= importance : q. v.) ; (4) उदारता (= magnanimity : q. v.) ; (5) विपुलता (= largeness : q. v.).

Greaves : जङ्घात्राणं and sim. comp.s.

Grecian : I. Adj. : (1) by comp. ; (2) *यावनिकः (की, कं). II. Subs. : (*a*) a Greek *यवनिकः. (*b*) one versed in Greek *यवनिकभाषाज्ञः.

Grecism : *यवनिकभाषानुसारिणी वाक्यपद्धतिः.

Greedily : expr. by adj. : v. also covetously.

Greediness, Greed : I. Covetousness : q. v. : गृध्नुता. II. Voracity : (1) घस्मरता *or* अद्मरता ; (2) जिघत्सा v. hunger.

Greedy : I. Covetous : q. v. : गृध्नु (mfn.). II. Of food : (1) अद्मरः *or* घस्मरः (रा, रं) (= voracious), *the g. destructive Rudra* घस्मरध्वंसरुद्र-, Vi. III. 48. ; (2) जिघत्सु (mfn.) (= wishing to eat) v. hungry.

Greek : i. e. *g. language* : *यवनिकभाषा. For other senses : v. grecian.

Green (adj.) : I. Of color : (1) हरितः (ता, तं) *or* हरित् (mfn.), *about g. paddy* हरिते धान्ये, M. VIII. 330. ; (2) पलाशः (शा, शं) (rare), *a wood g. like new leaves* नवपलाशपलाशवनं, Si. VI. 2. II. Fresh : q. v., *g. manhood* नववयस् ; *g. crop* नवशस्यं. III. Raw, immature : q. v. : अपरिणतः (ता, तं). IV. Not dry, as of g. wood : आर्द्र (f. र्द्रा).

Green (subs.) : I. The color : (1) हरितः ; (2) हरिद्वर्णः ; (3) पलाशः (rare). II. A grassy plain : शाद्वलस्थली : v. also grassy. III. In pl., vegetables : शाकं.

Green, to be *or* become : हरितायते (nomi.) (rare).

Green-finch : पक्षिभेदः ; हारीतः (?).

Greengage : no equiv. : *पलाशफलं. [19

Green-grocer : फलादिविक्रेतृ (f. त्री) ; फलोपजीविन् (f. नी), Ram. II. 90.

Greenhorn : (1) अपरिणतबुद्धि (mfn.) ; (2) अपक्वधी (n. धि) ; etc.

Green-house : *आतपशालं ; हरितगृहं.

Greenish : (1) ईषद्धरितः (ता, तं) ; (2) हरिदाभः (भा, भं). [turity : अपक्वता.

Greenness : I. Lit. : हरितता,-त्वं. II. Freshness : नवता. III. Imma-

Greensward : तृणावृता भूमिः and sim. comp.s.

GREENWOOD (adj.) : by comp., *g. shade* हरितवनच्छाया.

GREET (v.) : सभाजयति (सभाज्, c. 10.), *coming to g.* (*his daughter*) *out of affection* स्नेहात्सभाजयितुमेत्य, U. I. 7. ; *uses the right arm to g. me* सभाजने मे सव्येतरं भुजं प्रयुंक्ते, R. XIII. 43. : v. also TO SALUTE.

GREETER : (1) सभाजयितृ (f. त्री) ; (2) better by verb. [SALUTATION.

GREETING : (1) सभाजनं ; (2) अभिनन्दनं (= congratulation) : v. also

GREGARIOUS : (1) यूथचारिन् (f. णी) and sim. comp.s (= moving in company : as of elephants) ; (2) सङ्घप्रियः (या, यं) and sim. comp.s.

GREGARIOUSLY : (1) by adj. ; (2) सङ्घशः (in flock).

GRENADE : *अग्निगोलिका (used in a like sense in Mah.).

GRENADIER : *हस्तिबरस्थित् (m.).

GREY : v. GRAY. [युतीन्...... गजसोपानयद्दकन्, Ram. II. 72. 24.

GREYHOUND : श्वन् (m.), *and presented many tiger-like g.s* व्याघ्रसंहनन-

GRICE : शूकरशावः,-कः and sim. comp.s.

GRIDIRON : अम्बरीषं (?) ; भ्राष्टं (= frying pan).

GRIEF : (1) शोकः, *broken-hearted from g. on account of me* ममैव शोकेन विदीर्णवक्षसा, N. I. 140. ; (2) दुःखं (= pain), *g. at a son's loss dries up the heart, body, and mind* हृच्छरीरमनःशोषि दुःखं पुत्रवियोगजं, Ram. II. 76. 28. : v. also SORROW, DISTRESS. [सन्तापः.

GRIEVANCE : I. Injury : (1) दुःखं ; (2) कष्टं ; (3) क्लेशः. II. Grief :

GRIEVE (v. i.) : (1) शोचति, *why she will not g. in distress* कथं शोचेन्न दुःखिता, Ram. ; (2) by adj. v. SORRY. *To g. at or for* अनुशोचति, Mah.

GRIEVE (v. t.) : I. To afflict : (1) दुःखयति (nomi.), *this g.s me* अदो दुःखाकरोति मां, Si. II. 11. ; (2) तापयति, सं- (c. of तप्) (stronger), *g.d by widowhood* वैधव्यतापिता, Si. XI. 67. ; (3) दुनोति (दु, c. 5.), *I am not g.d* न दूये, Si. II. To mourn : शोचति, *I g. you* भवन्तं शोचामि, Mr. I.

GRIEVINGLY : शोचमानः (ना, नं) : v. SORROWFULLY.

GRIEVOUS : I. Heinous, aggravated : घोरः (रा, रं). Ph. *g. hurt* घोरक्षतं. II. Full of grief : शोकाकुलः (ला, लं). III. Painful : (1) दुःखाकरः (री, रं) ; (2) दुःखजननः (नी, नं) ; etc.

INQUISITORIAL : expr. by comp., *i. tribunal* *पाषण्डसंयमसभा.

INROAD : (1) उपद्रवः ; (2) अवस्कन्दः ; (3) आक्रमः, -मं. *To make an i. :* उप- *or* अभि-द्रवते (द्रु, c. 1.) (with acc.), Mab. ; अवस्कन्दति (स्कन्द्, c. 1.) (with acc.), Si.

INSALUBRIOUS : रोगकरः (री, रं) : v. UNHEALTHY.

INSANE : उन्मत्तः (त्ता, त्तं) : v. MAD.

INSANELY : उन्मत्तवत् : v. MADLY.

INSANITY : उन्मादः, *acute i.* तरुण उन्मादः, Bha. : v. MADNESS.

INSATIABLE : expr. by न तृप्तिमधिगच्छति (गम्, c. 1.).

INSATIABLENESS : अतर्प्यता (rare) : better by circum.

INSATIABLY : अतृप्तः (प्ता, प्तं), Vi. III. 24. ; अपरितृप्तः (प्ता, प्तं).

INSCRIBE : I. In gen. : (1) अभिलिखति (लिख्, c. 6.) (= to write) ; (2) मुद्रयति (मुद्र्, c. 10.) (= to engrave). II. In geo. : *to i. a square in a circle* वृत्तान्तर्वर्गं अभिलिखति *or* वर्णयति (वर्ण्, c. 10.).

INSCRIPTION : expr. by अभिलिखितः (ता, तं) *or* मुद्रितः (ता, तं).

INSCRUTABILITY : (1) अतर्क्यता ; (2) दुर्लक्ष्यता ; (3) दुष्प्रवेश्यता.

INSCRUTABLE : (1) अतर्क्य (f. र्क्या) ; (2) दुर्लक्ष्य (f. क्ष्या) ; (3) दुष्प्रवेशः (शा, शं).

INSCRUTABLY : expr. by adj. *or* comp.

INSECT : (1) कीटः ; (2) क्रिमिः (= worm). [(f. का).

INSECURE : I. Not firm : अस्थिरः (रा, रं). II. Apprehensive : साशङ्क

INSECURELY : I. Not firmly : अस्थिरं. II. Apprehensively : साशङ्कं.

INSECURITY : I. Unsafety : अस्थिरता. II. Danger : q. v. : सङ्कटता.

INSENSATE : निर्बोधः (धा, धं) (= stupid) : v. FOOLISH.

INSENSIBILITY : I. Unconsciousness : अचेतनता,-त्वं ; विचेतनता,-त्वं ; etc. II. Dullness, torpor : जाड्यं. III. Indifference, hardness : q. v. : expr. by verb : v. INSENSIBLE (IV).

INSENSIBLE : I. Imperceptible : q. v. : दुर्लक्ष्य (f. क्षा). II. Not conscious : (1) अचेतनः (ना, नं), विचेतनः (ना, नं), विगतचेतनः (ना, नं), etc. ; (2) निःसंज्ञ (f. ज्ञा). III. Benumbed : जडः (डा, डं). IV. To emotion : (1) by उपेक्षते (ईक्ष्, c. 1.) v. INDIFFERENT ; (2) न चेतयति,-ते (चित्, c. 10.) (with acc.) : v. also HARD, CRUEL.

INSENSIBLY : v. GRADUALLY, IMPERCEPTIBLY.

INSEPARABLE : अवियोज्य (f. ज्या) : v. SEPARABLE.

INSEPARABLY : expr. by circum. ; दृढं (= firmly).

INSERT : निवेशयति (c. of निश्), *the debtor shall i. his name with his own hand* ऋणी नाम स्वहस्तेन निवेशयेत्, Y. II. 88. : v. also TO PUT.

INSERTION : निवेशः,-नं.

INSIDE (adv.) : (1) अन्तर् ; (2) अभ्यन्तरं (= to i.) ; (3) अभ्यन्तरे (= in i.).

INSIDE (subs.) : अभ्यन्तरं : v. INTERIOR.

INSIDIOUS : कापटिकः (की, कं) : v. DECEITFUL.

INSIDIOUSLY : कपटेन : v. DECEITFULLY.

INSIDIOUSNESS : कापट्यं : v. DECEITFULNESS.

INSIGHT : ज्ञानं (= knowledge). *One who has a thorough i of* पारदर्शिन् (f. नी) in comp. *Getting thorough i. :* आभ्यन्तरीकरणं, D. II.

INSIGNIA : (1) लक्षणं ; (2) चिह्नं.

INSIGNIFICANCE : (1) निरर्थकता (not of men) ; (2) तुच्छता (= meanness).

INSIGNIFICANT : (1) निरर्थकः (का, कं) ; (2) तुच्छ (f. च्छा) (= mean, trivial).

INSIGNIFICANTLY : (1) निरर्थकं ; (2) तुच्छं (= meanly).

INSINCERE : (1) मौखिकः (की, कं) (= in mouth) : V. DECEITFUL, FALSE, AFFECTED, SINCERE. [(3) मुखेन (= in mouth).

INSINCERELY : (1) अनृजु V. CROOKEDLY ; (2) कपटेन V. DECEITFULLY ;

INSINCERITY : (1) by adj. ; (2) अनृजुता (= crookedness) ; (3) कपटता (= deceitfulness) ; (4) कृत्रिमता (= affectedness).

INSINUATE (v. i.) : I. To creep in : मन्दं मन्दं प्रसर्पति (सृप्, c. 1.). II. To ingratiate : q. v. [II. To hint : कटाक्षेण आक्षिपति (क्षिप्, c. 6.).

INSINUATE (v. t.) : I. To infuse gently : अल्पाल्पं निवेशयति (c. of विश्).

INSINUATING (adj.) : हृदयग्राहिन् (f. णी) (?).

INSINUATINGLY : *thus i. addressed* इति प्रविश्याभिहिता, Ku. v. 51. [प्रविश्यान्तर्गत्वा मनवद्रहस्यमुद्राभ्येत्यर्थः, M. n.]. [क्षेपः (?).

INSINUATION : I. Ingratiating : expr. by verb. II. A hint : कटाक्षा-

INSIPID : (1) विरसः (सा, सं) ; (2) नीरसः (सा, सं) ; (3) रसहीनः (ना, नं) ; etc.

INSIPIDITY : (1) नीरसता ; (2) विरसता ; (3) रसहीनता ; etc.

INSIPIDLY : नीरसं *or* विरसं (lit. and fig.).

INSIST : न ग्रहं मुञ्चति (मुच्, c. 6.) (?) ; दार्ढ्येन वदति (वद्, c. 1.) (= to say) *or* प्रार्थयते (अर्थ्, c. 10.) (= to ask) (?).

INSNARE : V. ENSNARE.

INSOBRIETY : पानासक्तिः : V. DRUNKENNESS.

INSOLENCE : (1) धार्ष्ट्यं *or* धृष्टता ; (2) अवलेपः *or* अवलिप्तता ; (3) प्रगल्भता *or* प्रागल्भ्यं ; (4) औद्धत्यं *or* उद्धतिः.

INSOLENT : (1) धृष्टः (ष्टा, ष्टं) ; (2) प्रगल्भ (f. ल्भा) ; (3) अवलिप्तः (प्ता, प्तं) (= arrogant) ; (4) उद्धतः (ता, तं) (= haughty).

INSOLENTLY : (1) धार्ष्ट्येन ; (2) प्रगल्भं ; (3) सावलेपं ; etc.

Insoluble: I. Not soluble : expr. by न गलति (गल्, c. 1.) : v. TO DISSOLVE. II. Not to be solved : (1) असाध्य (f. ध्या) (?) ; (2) by circum., *it is i.* अस्योत्तरं दातुं न शक्यते, after Mah.

Insolvency : परिक्षीणता (?) ; क्षीणधनता (?).

Insolvent : परिक्षीण (f. णा) : v. BANKRUPT.

Insomuch so *or* **that** : यतः *or* यस्मात् (= as).

Inspect : अवेक्षते (ईक्ष्, c. 1.) : v. TO LOOK INTO, EXAMINE.

Inspection : (1) अवेक्षा ; (2) परिदर्शनं : v. also EXAMINATION.

Inspector : (1) अवेक्षकः ; (2) परिदर्शकः.

Inspectorship : (1) अवेक्षकपदं (?) ; (2) परिदर्शकत्वं (??).

Inspiration : I. Inhalation : q. v. : श्वासः. II. Divine prompting : *by divine i.* आकस्मिकप्रत्ययप्रभावात्, U. II. ; *one who has received i. of language* आविर्भूतशब्दब्रह्मप्रकाशः (शा शं), U. II. III. Infusion : आधानं, सम्-.

Inspire (v. i.) : I. To breathe : q. v. : श्वसिति (श्वस्, c. 1.). II. To blow : q. v. : वहति (वह्, c. 1.).

Inspire (v. t.) : I. To inhale : q. v. II. To blow : पूरयति (पूर्, c. 10.) III. To infuse : (1) वितरति (तॄ, c. 1.) v. TO IMPART. ; (2) निवेशयति (c. of विश्) (= to instil) ; (3) सम्-आदधाति (धा, c. 3.) (= to put) ; (4) जनयति (c. of जन्) (= to cause), *to i. with fear* भयं जनयति (with gen.). IV. To disclose preternaturally : *i.d (persons)* दैवज्ञानापन्नाः ; *he was i.d with this knowlelge* ईश्वरप्रसादादिदं ज्ञानं लेभे, see Ki. III. 23 and 20, N. XIV. 8.

Inspirit : आश्वासयति (c. of श्वस्) : v. TO ENCOURAGE, CHEER.

Instability : (1) अस्थिरता ; (2) अस्थैर्यं ; (3) अनवस्थितिः.

Install : प्रतिष्ठापयति (c. of स्था) (with loc. of the place).

Installation : (1) प्रतिष्ठापनं ; (2) प्रतिष्ठा.

Installment : I. Installation : q. v. II. Part payment : (1) ऋणांशः (?) ; (2) °किस्ति (in the vernacular).

INSTANCE (subs.): I. Importance : गुरुत्वं. II. Solicitation : प्रार्थना. III. Example : q. v. : उदाहरणं. *For i.:* तथाहि, *for i., Pururavas met destruction from a thirst after Brahmin's money* तथाहि पुरूरवा ब्राह्मणधनतृष्णया विननाश, Va. *As for i.* : तद्यथा, *as for i., in the entirety of the family etc. one attributes to himself "I am entire"* तद्यथा पुत्रभार्यादिषु सकलेष्वहमेव सकल इत्यात्मन्यध्यस्यति, S. Ph.: *in the first i.* प्रथमतः ; *Visva Prakásha in the three i.s* त्रिषु विश्वप्रकाशः, Va. com.

INSTANCE (v.): उदाहरणं, निदर्शनं, *or* दृष्टान्तं ददाति (दा, c. 3.).

INSTANT (adj.): I. Earnest : q. v. : आग्रहवत् (f. ती). II. Immediate : (1) सद्यः, *i. death* सद्योमृत्युः ; (2) by adv. : v. I.LY (1).

INSTANT (subs.): I. Moment : q. v. : क्षणः. II. A day of the current month : *on the 5th. i.* अस्य मासस्य पञ्चमदिवसे *or* आगामिनि *or* गते पञ्चमदिवसे (according as it is coming or past). [M. n.

INSTANTANEOUS : (1) क्षणमात्रभवः (वा, वं), Si. ; (2) क्षणमात्रस्थायिन् (f. नी).

INSTANTANEOUSLY : (1) क्षणेन ; (2) मुहूर्तमात्रेण ; (3) एकपदे.

INSTANTLY : I. Immediately : (1) झटिति, Vi. I. 43. ; (2) सपदि, Ki. XIII. 25. ; (3) तत्क्षणं,-णात्, P. I. 5. ; (4) द्राक्, Vi. I. 34. ; (5) अधुनैव (= just now), Vi. III. 34. ; (6) अञ्जसा (= quickly). II. Urgently : (1) आग्रहपूर्वकं ; (2) निर्बन्धेन.

INSTEAD OF : I. Before a subs. : स्थाने, *i. of self* आत्मस्थाने, P. I. 4. ; *some read* वासिका *i. of* विलासिका, केचिद्विलासिकास्थाने वासिकेति पठन्ति, Sah. II. Before pres. part.s : expr. by negative, may be strengthened with वस्तुतः *or* प्रत्युत (= in fact) : *i. of amassing, he squandered his money* सञ्चयमकृत्वा स धनं क्षपयामास. III. Equal to : q. v.

INSTEP : पिच(चि)ण्डिका ; पिण्डिका, Bha.

INSTIGATE : प्रोत्साहयति (c. of सह्) : v. TO ENCOURAGE, EXCITE.

INSTIGATION : प्रोत्साहनं : v. ENCOURAGEMENT.

INSTIGATOR : प्रोत्साहकः : v. INCITER, ENCOURAGER.

INSTILL : (1) निवेशयति (c. of विश्) ; (2) सम्-आदधाति (धा, c. 3.).

INSTINCT (subs.) : (1) अन्तःप्रवृत्तिः (?) ; (2) सहजज्ञानं (??).

INSTINCT : (adj.) : (1) उत्तेजितः (ता, तं) ; (2) चलितः (ता, तं).

INSTINCTIVE : expr. by adv.

INSTINCTIVELY : (1) अन्तःप्रवृत्त्या (??) ; (2) स्वत एव (= naturally).

INSTITUTE (subs.) : I. Maxim, precept : q. v. II. An institution : सभा (?). III. In pl., संहिता, *i.s of Manu* मनुसंहिता.

INSTITUTE (v.) : To establish, found : q. v. : स्थापयति (c. of स्था). II. To begin : q. v. : उपक्रमते (क्रम्, c. 1.). [A society : सभा.

INSTITUTION : I. Establishment : स्थापनं. II. Instruction : शासनं. III.

INSTRUCT : (1) शिक्षापयति (c. of शिक्ष्) (= to teach : q. v.), *i. me how to salute* केन प्रकारेण प्रणामः कर्तव्यस्तन्मां शिक्षापय, Vet. 25.: (2) शासति, अनु-, (शास्, c. 2.), *thus i.ing the elder of Arjuna* इत्यनुशासतमर्जुनाग्रजं, Ki. II. 54. ; (3) उपदिशति (दिश्, c. 6.), *by doing them in a better style, the girl as if i.s me in return* तत्तद्विशेषकरणात् प्रत्युपदिशतीव मे बाला, Mal. I.

INSTRUCTION : I. Teaching : (1) शिक्षा ; (2) उपदेशः, *in receiving i.* उपदेशग्रहणे, Mal. I. II. Education : (1) विनयनं, *thorough i. in the art of conversation* वचनकौशलेषु सम्यग्विनयनं, D. II. ; (2) by verb. III. Precept, command : q. v. : शासनं. [(f. सिका) ; etc.

INSTRUCTIVE : (1) शिक्षादायिन् (f. नी) ; (2) उपदेशगर्भ (f. र्भा) ; (3) अनुशासक

INSTRUCTOR : (1) शिक्षकः v. TEACHER ; (2) शासक (rare), Vi.

INSTRUMENT : I. Implement, tool : q. v. : यन्त्रं, *hand is the chiefest i.* हस्तं प्रधानतमं यन्त्राणां, Sr. ; *the chapter on i.s* यन्त्राध्यायः, Go. *Musical i.* वादित्रं, Mah. II. A deed : q. v. : लेख्यं. III. An agent, tool : q. v. : साधनं.

INSTRUMENTAL : expr. by subs., *I was i. in his release* तस्य मोक्षस्य साधनमहमासं : v. also CAUSE. Ph. : *i. case* करणं ; *i. music* वादित्रं v. MUSIC.

INSTRUMENTALITY : expr. by साधनं or by -कारकः (का, कं) in comp.

INSUBORDINATE : (1) अवश्य (f. श्या) ; (2) अविधेयः (या, यं).

INSUBORDINATION : (1) अवश्यता ; (2) अविधेयता ; (3) अननुविधायिता.

INSUFFERABLE : (1) असह्य (f. ह्या) ; (2) दुःसहः (हा, हं) ; (3) असहनीय (या, यं) ; (4) अविषह्य (f. ह्या).

INSUFFERABLY : (1) असह्यं ; (2) दुःसहं, etc. ; (3) by adj.

INSUFFICIENCY : I. Deficiency, want : q. v. : न्यूनता. II. Inability, incapacity : q. v. : अक्षमता.

INSUFFICIENT : I. Deficient : (1) न्यूनः (ना, नं) ; (2) अप्रचुरः (रा, रं). II. Incapable, unfit : q. v. : अक्षमः (मा, मं).

INSUFFICIENTLY : expr. by adj.

INSULAR : (1) by comp. ; (2) द्वैप्य (f. प्या), Si. III. 76.

INSULATE : (1) पृथक्करोति ; (2) विश्लेषयति (c. of श्लिष्). [IGNOMINY.

INSULT (subs.) : (1) अपमानः ; (2) अवमानः,-ना ; (3) विमानना : v. DISGRACE,

INSULT (v.) : अप(व)मानयति (c. of मन्) : v. TO DISGRACE. *I.ing language :* आक्षेपवचः, Ki.

INSULTINGLY : (1) सावलेपं (= insolently) ; (2) अवज्ञया (= despisingly) ; (3) साक्षेपं (= abusingly).

INSUPERABLE : (1) दुर्लंघ्य (f. घ्या) ; (2) अनतिक्रमणीयः (या, यं) ; (3) दुरतिक्रम्य (f. म्या).

INSUPERABLY : expr. by adj. *or* circum.

INSUPPORTABLE : दुर्वहः (हा, हं) : v. INSUFFERABLE.

INSUPPORTABLY : (1) दुर्वहं ; (2) दुःसहं (= insufferably).

INSURANCE : *i. company* *अभिरक्षासमाजः. *N. B.* Wilson seems to think योगक्षेम as a sort of i. probably on M. VII. 127., but even Kulluka's interpretation does not countenance it.

INSURE : I. To guard, secure : q. v. : रक्षति (रक्ष्, c. 1.). II. In mercantile sense : *अभिरक्षति.

INSURER : *अभिरक्षकः, *life-i.* जीवनाभिरक्षकः.

INSURGENT ; राजद्रोहिन् (f. णी) : v. REBELLIOUS.

INSURMOUNTABLE : अलङ्घ्य (f. ङ्घ्या) : v. INSUPERABLE.

INSURRECTION : राजविद्रोहः : v. REBELLION, REVOLT.

INSURRECTIONARY : राजद्रोहिन् (f. णी) : v. REBELLIOUS, SEDITIOUS.

INTACT : (1) अखण्ड (f. ण्डा) ; (2) अविकल: (ला, लं) : v. ENTIRE.

INTANGIBLE : दुर्ग्रह: (हा, हं) : v. TANGIBLE.

INTEGER : पूर्णाङ्क: ; समयसंख्या (?).

INTEGRAL : (1) अविकल: (ला, लं) v. WHOLE ; (2) आवश्यकीय: (या, यं) v. NECESSARY. *I. calculus* *समाहारगणितं.

INTEGRATE : *in calculus* : *समाहारीकरोति ; समाहारं वदति (to say).

INTEGRITY : I. Entireness : q. v. : (1) अखण्डता ; (2) अविकलता. II. Honesty, uprightness : q. v. : आर्जवं.

INTEGUMENT : वेष्टनं, Bha. : v. COVERING.

INTELLECT (1) बुद्धिः, *one whose i. is (sharp) like the point of the Kusa* कुशाग्रबुद्धि (mfn.), R. v. 4. ; (2) धीः, *with all the excellences of i.* समग्रैर्धियो गुणैः, R. III. 30. ; (3) धिषणा (rare), *guilty i.* पापधिषणा, Vi. VI. 8 : v. also MIND.

INTELLECTUAL : In gen. : expr. by comp., *i. powers* बुद्धिशक्तयः. II. Mental : q. v. : मानसिक: (की, कं). Ph. : *i. culture* शास्त्रानुशीलनं *or* शास्त्रदर्शनं (?). III. Intelligent : q. v.

INTELLECTUALLY : (1) बुद्ध्या ; (2) धिया ; (3) धिषणया.

INTELLIGENCE : I. Intellect : q. v. : बुद्धिः. II. Knowledge imparted : (1) व्युत्पत्तिः ; (2) आगमः (rare), K. I. 15. III. News : q. v. : वार्ता. IV. An intelligent being : बुधः, वि-, N. I. 1.

INTELLIGENCER : वार्तावहः : v. MESSENGER.

INTELLIGENT : I. Possessing (good) intellect : (1) बुद्धिमत् (f. ती) ; (2) धीमत् (f. ती) ; (3) उदारधी (n. धि) (= highly i.), R. III. 30. ; etc. II. Well-informed : व्युत्पत्तिमत् (f. ती) *or* व्युत्पन्नचित्त (f. त्ता), S.

INTELLIGENTIAL : I. Of acts etc. : बुद्धिपूर्व (f. र्वा), K. II. Mental : मानसिक (f. की).

INTELLIGENTLY : (1) बुद्धिपूर्वं ; (2) चतुरं v. SKILFULLY.

INTELLIGIBILITY : (1) बोधगम्यता ; (2) सुबोधता ; (3) स्पष्टता.

INTELLIGIBLE : (1) बोधगम्य (f. म्या) ; (2) स्पष्ट (f. ष्टा) (= clear : q. v.).

INTELLIGIBLY : (1) स्पष्टं (= clearly : q. v.) ; (2) by adj. *or* circum.

INTEMPERANCE : I. Incontinence : असंयमः. II. In drink : अतिपानं. III. In eating : अत्याहारः. IV. Excess : अतिभोगः (?).

INTEMPERATE : (1) असंयतः (ता, तं) (= incontinent) ; (2) अतिपानासक्तः (क्ता, क्तं) (in drinking) ; (3) भोगासक्त (f. क्ता).

INTEMPERATELY : (1) असंयतं ; (2) अपरिमितं (= immoderately).

INTEMPERATENESS : अतिपानासक्तिः etc. : v. INTEMPERATE.

INTEND : (1) by subs. ; (2) अभिप्रैति (इ, c. 2.) ; (3) सं-कल्पते (क्लृप्, c. 1.), *we were i.ed by you their price* भवता वयमेतेषां मूल्यं कल्पिताः, Mu. v. ; (4) प्रतिपद्यते (पद्, c. 4.), *what the king of Vidarbha i.s* किं प्रतिपद्यते वैदर्भः, Mal. I. ; (5) इच्छति (इष्, c. 1.) (= to wish : q. v.).

INTENDANT : अध्यक्षः : v. SUPERINTENDENT.

INTENSE : प्रचण्ड (f. ण्डा) (= fiery), *i. heat* प्रचण्डातपः, Ki. I. 10. ; (2) तीव्र (f. व्रा), *i. affliction* तीव्राभिषङ्गः, Ku. III. 73. v. SHARP ; (3) नितान्तः (न्ता, न्तं) (= excessive : q. v.).

INTENSELY : I. Exceedingly : q. v. : (1) नितान्तं, *i. cold* नितान्तशीतः (ता, तं), D. VII. ; (2) rarely by यङ् *to shine i.* देदीप्यते. II. Attentively : q. v. : सावधानं.

INTENSIFY : (1) वर्धयति (c. of वृध्). (= to increase) ; (2) by adj.

INTENSITY : (1) प्रचण्डता (as of heat) ; (2) तीव्रता (as of pain) ; (3) प्रगाढता (as of love) ; (4) अतिशयः- in comp. v. EXCESSIVE.

INTENSIVE : in gram. : भृशार्थकः (का, कं), यङ् *is also i.* भृशार्थे च यङ् स्यात्.

INTENSIVELY : भृशार्थे ; भृशार्थद्योतनाय.

INTENT (subs.) : v. INTENTION. Ph. : *with deliberate i.* सङ्कल्पपूर्वकं ; *to all i.s and purposes* सर्वथा ; *to the i. that* एतदभिप्रायकः (का, कं) ; *the i.* (*of this passage*) *is......*इति भावः, M. n.

INTENT (adj.) : I. Fixed closely : (1) एकाग्र (f. ग्रा), *i. on hearing their songs* तद्गीतश्रवणैकाग्रा, R. xv. 66. ; (2) एकाग्रचित्त (f. त्ता) (= with i. mind) ; (3) अनन्यमनस् (mfn.) (= 2) ; (4) एकायनः (ना, नं), -गतः (ता, तं) ; (5) एकतानः (ना, नं). II. Engaged, bent : (1) अभिनिविष्टः (ष्टा, ष्टं) ; (2) अभियुक्तः (क्ता, क्तं).

INTENTION : I. Purpose : (1) अभिप्रायः, *it was the i. of Drona* एवं किल द्रोणस्याभिप्राय आसीत्, Vi. ; (2) संकल्पः (= determined wish), *but* (*her*) *guardian's i. is to give her to a suitable person* गुरोः पुनरस्या अनुरूपवरप्रदाने संकल्पः, Sa. I. ; (3) प्रतिपत्तिः (rare), *what is your i. now* काद्य ते प्रतिपत्तिः, D. II. ; (4) आशयः (= design), *evil-i.ed* पापाशयः, H. II. : v. also WISH. II. Intentness : q. v.

INTENTIONAL : expr. by adv.

INTENTIONALLY : (1) कामतः or कामात्, *uni. or i.* अकामादथ कामतो वा, Pa. ; (2) प्रतिपत्त्या (rare), R. : v. also KNOWINGLY.

INTENTLY : (1) एकाग्रचित्तेन ; (2) अनन्यमनसा ; (3) अनन्यवृत्ति (mfn.). अनन्यदृष्टि (mfn.) (in seeing), etc., Ku. v. 20. [INTENT.

INTENTNESS : (1) एकाग्रता ; (2) अनन्यमनस्कता ; (3) अभिनिवेशः ; etc. : v.

INTER : निदधाति (धा, c. 3.) : v. TO BURY. [Mah. IV. 52.

INTERCALARY : अधिकः (का, कं), Nil. "पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।"

INTERCALATE : अधिकदिनं निवेशयति (c. of विश्) (?).

INTERCALATION : of a day : अधिकदिननिवेशनं (?).

INTERCEDE : अनुरुणद्धि (रुध्, c. 1.) ; अनुरोधं करोति.

INTERCEDER : अनुरोधकारिन् (f. णी) : v. also MEDIATOR.

INTERCEPT (v.) : निरुणद्धि (रुध् c. 7.), Si. II. 64. : v. OBSTRUCT.

INTERCEPT (subs.) : of two circles : ग्रासः, A. b.

INTERCESSION : अनुरोधः : v. also MEDIATION.

INTERCESSOR : अनुरोधकारिन् (f. णी) : v. also MEDIATOR.

INTERCESSORY : अनुरोध- in comp.

INTERCHANGE (subs.) : (1) विनिमयः, *making i. of rings* अङ्गुलीयकविनिमयं कृत्वा, D. ; (2) व्यतिकरः (of acts), *i. of abuse* अधिक्षेपव्यतिकरः, D. : v. EXCHANGE, CHANGE.

INTERCHANGE (v.) : (1) by subs. ; (2) दत्त्वा प्रतिगृह्णाति (ग्रह्, c. 9.).

INTERCHANGEABLE : I. Exchangeable : विनिमेयः (या, यं). II. Following alternately : पर्यायवर्तिन् (f. नी).

INTERCHAGEABLY : (1) विनिमयेन (by exchange) ; (2) पर्यायेण (= alternately).

INTERCOURSE : (1) सङ्गः, सङ्गमः, *or* समागमः, *by i. with inferiors* नीचैः सह समागमात्, H. 42. ; *i. with a lioness* केसरिकलत्रसमागमः, D. II. ; (2) संसर्गः, *i. with wanton women* पुंश्चलीभिः सह संसर्गः, H. I. 113.

INTERDICT (subs.) : निषेधः : v. PROHIBITION.

INTERDICT (v.) : निषेधति (सिध्, c. 1.) : v. TO FORBID, PROHIBIT.

INTEREST (v.) : I. To amuse, delight : q. v. : रञ्जयति (रञ्ज्, c. 10.). Ph. : *and he is i.ed in us* स च स्निह्यत्यावयोः (स्निह्, c. 4.), U. VI. II. To concern : expr. with अर्थः : v. DO WITH. III. Reflexively, to excite for another : *he i.s himself much in philosophy* दर्शनासक्तचेताः सः (?) : v. TO ATTACH.

INTEREST (subs.) : I. Concern : अर्थः, *in your i.* त्वदर्थं *or* त्वदर्थे. II. Regard : q. v. : आदरः. *To feel, take i.* आद्रियते (दृ, c. 4.), K. III. Share : q. v. : अंशः. IV. Good : q. v. : हितं. V. Affection : q. v. : स्नेहः. VI. In commerce : (1) वृद्धिः, *compound i.* चक्रवृद्धिः, Vri. ; (2) कलान्तरं, *capital and i.* मूलकलान्तरे, Li. Ph. : *at five per cent [per month]* पञ्चकेन शतेन, Li. *N. B.* note that *i.* means *monthly i.* unless specified.

INTERESTED : I. Partial : पक्षपातिन् (f. नी), *I and the queen are i.* पक्ष-

पातिनावर्ह देवी च, Mal. I. II. Looking to one's own interest : स्वार्थपरः (रा, रं) *or* स्वार्थपरायण (f. णा).

INTERESTING (adj.) : (1) हृदयग्राहिन् (f. णी) ; (2) मनोहरः (रा, रं) ; (3) रमणीयः (या, यं), *i. story, go on* रमणीया कथा ततस्ततः, Mal. IV.

INTERFERE : I. To clash : q. v. II. To intermeddle : q. v. : (1) हस्तं ददाति (दा, c. 3.) (?) ; (2) मध्ये तिष्ठति (स्था, c. 1.) (= to interpose).

INTERFERENCE : expr. by verb.

INTERIM : मध्यकालः. Ph. : *in the i.* अस्मिन् काले.

INTERIOR (subs.) : (1) अभ्यन्तरं ; (2) गर्भः (= womb) ; (3) उदरं (= heart), *the i. of an edifice* मन्दिरोदरं, Ri. V. 2.

INTERIOR (adj.) : V. INNER, INTERNAL. Ph. : *i. angle* अन्तर्गतकोणः, K. d.

INTERJACENT : (1) मध्यवर्तिन् (f. नी) ; (2) मध्यस्थ (f. स्था).

INTERJECTION : भावव्यञ्जकमव्ययं.

INTERLACE : परिवेष्टयति (वेष्ट्, c. 10.) (= to encircle : q. v.).

INTERLARD : सं-मिश्रयति (मिश्र्, c. 10.) : V. TO MIX.

INTERLEAVE : *to i. a book* *पत्राणि पुस्तकान्तर्निवेशयति (c. of विश्).

INTERLINE : *to i. Latin and English* *पर्यायेण लाटिनेंग्रेजीपंक्ती लिखति ; *with i.ar paraphrase* *सान्तःपंक्तिलिखितानुवादः (दा, दं).

INTERLINEATION : I. The act : expr. by verb. II. An interlineated passage : etc. : *अन्तः पंक्तिलिखितं.

INTERLOCUTOR : (1) संवादकः ; (2) संवादिन् (m.) ; (3) संवादकारकः.

INTERLOPER : *अनधिकारप्रवेशकः [आगन्तुकः may gen. do].

INTERLUDE : *मध्यरङ्गः (after पूर्वरङ्गः).

INTERLUNAR : अमावस्या- in comp.

INTERMARRIAGE : expr. by विवाह (= marriage) and मध्ये (= between).

INTERMARRY : *it is lawful to i. now* *अधुना भिन्नजात्यां विवाहो न विधिविरुद्धः.

INTERMEDDLE : *you are not to i. in my work* मम नियोगस्य चर्चा त्वया न कर्तव्या, H. II. ; *i.ing* पराधिकारचर्चा.

INTERMEDIATE : (1) मध्यवर्तिन् (f. नी) ; (2) अन्तर्वर्तिन् (f. नी) : v. MIDDLE.

INTERMENT : निधानं : v. BURIAL.

INTERMINABLE : (1) अनन्त (f. न्ता) ; (2) अपर्यन्त (f. न्ता) ; (3) निरवधि (mfn.).

INTERMINABLY : (1) अनन्तं ; (2) अपर्यन्तं.

INTERMINGLE : मिश्रयति (मिश्र्, c. 10.) : v. TO MIX.

INTERMISSION : विरामः or विरतिः : v. CESSATION. *Without i.* अविरतं v. INCESSANTLY.

INTERMIT : I. Trans. : निवर्तयति (c. of वृत्). II. Intrans. : विरमति (रम्, c. 1.) : v. TO CEASE.

INTEMITTENT : *That (fever) which is not at all i. is called continuous* सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते, Sr. ; *high i. fever* विषमज्वरः, Sr.

INTERMITTENTLY : *coming i. (of fever)* विरीत्थितः (ता, तं), Bha.

INTERMIX : संमिश्रयति (मिश्र्, c. 10.) : v. TO MIX.

INTERMIXTURE : सम्मिश्रणं : v. MIXTURE.

INTERNAL : (1) अन्तर् in comp., *i. heat* अन्तर्दाहः, U. III. 31. ; *arising from i. disaffection* अन्तःप्रकृतिप्रकोपजः (जा, जं), Ki. II. 61. ; (2) आभ्यन्तर (f. री) (rare), *secretly fomenting external and i. discord* बाह्याभ्यन्तरान् कोपान् गूढमुत्पाद्य, D. VIII. ; (3) अन्तर्गतः (ता, तं) (what is in), (*but*) *as you know the i. feelings of animals* अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावं, R. II. 43. ; (4) अन्तःस्थ (f. स्था) (what stands in) ; (5) अन्तर्भवः (वा, वं) (what is born in).

INTERNALLY : अन्तर्, *i. towards you* अन्तस्त्वां प्रति, Vi. III. 43. ; *externally and i.* बहिरन्तश्च, Ki. II. 53.

INTERNATIONAL : *i. law* *राष्ट्राणां परस्परव्यवहारः.

INTERNECINE : perh. अन्तर्ध्वंसिन् (f. नी) : v. DESTRUCTIVE.

INTERNUNCIO : of the pope : *अनुदूतः.

INTERPOLATE : स्वकृतेनाध्यायश्लोकीकृतेन वा श्लोकादिना ग्रन्थं दूषयति (c. of दुष्) (?).

INTERPOLATION : expr. as above. The Bombay edition uses आधिक्यं (= excess) for the i.s of the Mah.

INTERPOLATOR : ग्रन्थदूषकः (?).

INTERPOSE : I. To introduce : निक्षिपति (क्षिप्, c. 6.) : v. TO CAST. II. To interfere : expr. by मध्ये तिष्ठति (स्था, c. 1.) or माध्यस्थ्यं करोति. III. To intrude : q. v. [माध्यस्थ्यं.

INTERPOSITION : I. A coming between : मध्यवर्त्तिता. II. Mediation :

INTERPRET : व्याख्याति (ख्या, c. 2.) : v. TO EXPLAIN.

INTERPRETATION : व्याख्या : v. EXPLANATION, MEANING.

INTERPRETER : I. An expositor : व्याख्यातृ (m.) II. A translator : *Persian i.* *पारसिकभाषाबोधकः.

INTERREGNUM : *in the i.* शून्ये सिंहासने : v. REGENT.

INTERROGATE : प्रश्नं करोति : v. TO ENQUIRE, QUESTION.

INTERROGATION : expr. by verb. *Note of i.* : *प्रश्नचिह्नं.

INTERROGATIVE : प्रश्नार्थकः (का, कं), *'who' is i.* किं प्रश्ने.

INTERROGATIVELY : प्रश्नक्रमेण (?) ; प्रश्नरूपेण (?).

INTERROGATOR : प्राश्निकः, Mah. I. [TIVE.

INTERROGATORY : I. Subs. : v. QUESTION. II. Adj. : v. INTERROGA-

INTERRUPT : (1) प्रतिबध्नाति (बन्ध्, c. 9.), *do not i. him* नैनमन्तरा प्रतिबध्नीत, Sa. ; (2) उप-रुणद्धि, नि-, (रुध्, c. 7.) (= to check), *to i. his progress* तत्प्रसरं निरोद्धुं, Vi. IV. 6. ; (3) आक्षिपति (क्षिप्, c. 6.) (= to throw out), *i.ing his saying* अस्य वचनमाक्षिप्य, K. : v. also TO BREAK OFF.

INTERRUPTEDLY : अन्तरान्तरा प्रतिबद्ध (f. द्धा) ; सविच्छेदं (with breaks).

INTERRUPTION : (1) प्रतिबन्धः ; (2) उपरोधः, *i of business* कार्योपरोधः, Sa. ; (3) अन्तरायः, *without i. to (your) other works* क्रियान्तरान्तरायमन्तरेण, Mu. v. also BREAK.

INTERSECT : सम्पातं करोति, K. d. ; अन्तरा छिनत्ति (छिद्, c. 7.). [meaning).

INTERSECTION : सम्पातः, K. d. ; छेदः (the context determining the

INTERSPERSE : *the forest is i.d with cocoa-nut trees* वनस्थान्तरान्तरा नारिकेलपादपाः, after K.

INTERSTICE : (1) छिद्रं ; (2) रन्ध्रं, *without i.* (adv.) नीरन्ध्रं, Ki.

INTERTWINE, INTERTWIST : संग्रथ्नाति (ग्रन्थ्, c. 9.).

INTERVAL : (1) अन्तरं ; (2) अन्तरालः, *without i.* निरन्तराल: (ला, लं), Ki. ; *in the i.* अन्तराले, U. : v. also REMISSION. Ph. : *after so long an i.* एतावत्कालानन्तरं ; *but on his saying without i.* तद्वाक्यसमकालन्तु, Mah. I. 131. 14.

INTERVENE : I. To interpose : मध्ये तिष्ठति (स्था, c. 1.). II. Of time : अतिवहति (वह्, c. 1.) : v. TO PASS. III. To interrupt : अन्तरायी भवति, R. XIV. 65.

INTERVENING (adj.) : मध्यस्थ (f. स्था) or मध्यवर्त्तिन् (f. नी). *I. spaces* : अन्त-[राल: : v. INTERVAL.

INTERVENTION : v. INTERPOSITION.

INTERVIEW : दर्शनं, सं- : v. CONFERENCE, TO MEET.

INTERWEAVE : perh. संवपति (वप्, c. 1.) ; संग्रथ्नाति (ग्रन्थ्, c. 1.).

INTESTACY : expr. by circum. : v. INTESTATE.

INTESTATE : *he died i.* *इच्छापत्रमकृत्वा ममार ; *this estate is i.* *एतत्सम्पत्तिविषयकमिच्छापत्रं न कृतं.

INTESTINAL : expr. by comp. : v. INTESTINE (subs.).

INTESTINE (adj.) : अन्तर् in comp. : v. INTERNAL.

INTESTINE (subs.) : अन्त्राणि (n. pl.), Bha.

INTHRALL : दासीकरोति : v. TO ENSLAVE.

INTIMACY : गाढसौहृदं : v. FRIENDSHIP. Ph. : *Your Majesty were in terms of the greatest i. with the poet Kálidása* देव ! कालिदासकविना सह [भवतः] नितान्तं निविडतमा मैत्री [आसीत्], Bho.

INTIMATE (adj.) : गाढः (ढा, ढं), प्र- (= deep : q. v.). Ph. : *i. friend* हृदयङ्गमः सखा, Ku. IV. 24. ; *i. relation* अन्तरङ्गः, M. n.

INTIMATE (v.) : (1) सूचयति (सूच्, c. 10.) (= to indicate : q. v.) ; (2) व्यनक्ति (अञ्ज्, c. 7.) (= to express : q. v.).

INTIMATELY : (1) गाढं, प्र- (= deeply) ; (2) निविडं (= closely).

INTIMATION (1) सूचना (= indication) ; (2) व्यञ्जनं (= expression).

INTIMIDATE : भीषयति (c. of भी) : V. TO FRIGHTEN.

INTIMIDATION : (1) expr. by verb ; (2) भीषिका *or* भीषा (= threat), *dispossessing by i.* भीषया हरणं, M.

INTO : मध्ये (with gen.) : V. WITHIN, IN.

INTOLERABLE : असह्य (f. ह्या), *i. dust* असह्यरेणु-, Ri. I. 10. : V. INSUFFERABLE.

INTOLERABLY : (1) असह्यं etc. ; (2) by adj.

INTOLERANCE : (1) अक्षमा (= impatience) ; (2) कोप: (?), Raj. I. 200.

INTOLERANT : अक्षमिन् (f. णी) : V. IMPATIENT.

INTONATION : स्वर: : V. TONE.

INTONE : स्वरेण पठति (पठ्, c. 1.) *or* वाचयति (c. of वच्).

INTOXICATE : (1) मादयति (c. of मद्) ; (2) मत्तीकरोति ; (3) मदं जनयति (c. of जन्). *I.d* : मत्त: (त्ता, त्तं) : V. DRUNK. *To be i.d* : (1) मदेन स्पृश्यते (pass. of स्पृश्), D. II. ; (2) क्षीवति,-ते (क्षीव्, c. 1.) (rare).

INTOXICATING (adj.) : (1) मादक (f. दिका) ; (2) मदजनन: (नी, नं) (?).

INTOXICATION : मत्तता : V. DRUNKENNESS.

INTRACTABLE : (1) दुर्दान्त (f. न्ता) ; (2) दुर्दम: (मा, मं).

INTRACTABLENESS : (1) दुर्दमता ; (2) अदम्यता ; (3) दुर्दान्तता.

INTRANSITIVE : अकर्मक: (का, कं). *I.ly* : expr. by adj.

INTRENCH : I. To fortify with a trench : परिखया परिवेष्टयति (वेष्ट्, c. 10.). II. To encroach : q. v. : गृह्णाति (ग्रह्, c. 9.).

INTRENCHMENT : परिखा : V. DITCH.

INTREPID : निर्भय: (या, यं) : V. FEARLESS.

INTREPIDITY : (1) निर्भीकता ; (2) निर्भयता ; (3) अभय:.

INTREPIDLY : निर्भयं : V. FEARLESSLY.

INTRICACY : (1) विषमता ; (2) वैषम्यं.

INTRICATE : (1) विषम: (मा, मं) ; (2) निगूढ (f. ढा) (= profound).

INTRICATELY : (1) विषमं ; (2) निगूढं.

INTRIGUE (subs.) : I. A plot : उपजाप:. II. An amour : व्यभिचार:.

INTRIGUE (v. i.) : उपजपति (जप्, c. 1.), *we two together will i. with Nágapala* आवां सम्भूय नागपालमुपजपावः, D. VIII.

INTRIGUER : उपजापकः ; उपजापकारिन् (m.).

INTRINSIC : perh. यथार्थ (f. र्था) (= real : q. v.).

INTRINSICALLY : यथार्थतः (= really, truly : q. v.).

INTRODUCE : I. To lead in : प्रवेशयति (c. of विश्). : II. To bring to be acquainted : perh. परिचयं जनयति (c. of जन्) (with gen.). III. To bring into practice : प्रवर्तयति (c. of वृत्). IV. To produce : q. v. : जनयति (c. of जन्).

INTRODUCER : expr. by verb.

INTRODUCTION : I. Preface : (1) मुखबन्धः ; (2) भूमिका ; (3) प्रस्तावना (of a play). II. Leading in : प्रवेशनं. III. Rudiments : उपक्रमणिका. IV. In other senses : expr. by verb.

INTRODUCTORY ; I. Lit. : प्रावेशिकः (की, कं), *i. song* प्रावेशिक्यास्त्रिकिका, V. IV. II. Preparatory : (1) expr. by subs., *i. chapter* मुखबन्धः,- अध्यायः ; (2) प्रथमः (मा, मं) (= first) may occasionally do.

INTROSPECTION : (1) अन्तर्दर्शनं ; (2) दर्शनं (= view) will gen. do.

INTRUDE : अनाहूतः (ता, तं) प्रविशति (विश्, c. 6.) (= to enter uninvited) (?) : v. also TO ENCROACH.

INTRUSION : expr. as above : v. also ENCROACHMENT.

INTRUSIVE : धृष्टः (ष्टा, ष्टं) (?) ; better by verb : v. TO INTRUDE.

INTRUST : v. ENTRUST.

INTUITION : *सहजज्ञानं.

INTUITIVE : (1) *सहजज्ञानलब्ध (f. ब्धा) ; (2) by adv.

INTUITIVELY : *सहजज्ञानेन. The idea probably occurs in Ki. XI. 8. "अविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः" (= *for one i. knows a friend*), in Ki. XIII. 6. "विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा", and similar passages.

INTUSSUSCEPTION : उद्घावर्तः (?).

INTWINE : v. ENTWINE.

INUNDATE : प्लावयति, आ-, परि- (c. of प्लु) : v. TO DELUGE.

INUNDATION : (1) वन्या ; (2) जलप्लावनं : v. FLOOD.

INURE : अभ्यस्यति (अस्, c. 4.) : v. TO ACCUSTOM.

INUREMENT : अभ्यासः : v. PRACTICE.

INURN : निदधाति (धा, c. 3.) : v. TO BURY, PUT.

INUTILITY : अनुपयोगिता : v. USELESSNESS.

INVADE : आ-क्रामति (क्रम्, c. 1.), *thus i.ing the eastern provinces* पौरस्त्या-नेवमाक्रामंस्तांस्ताञ् जनपदान्, R. IV. 34. : v. TO ATTACK, DEPREDATE.

INVADER : आक्रमणकारिन् (n.). Often expr. by *enemy* : q. v. [मार्थ.

INVALID (adj.) : I. Weak : q. v. : दुर्बलः (ला, लं). II. In law : अप-

INVALID (subs.) : (1) रोगिन् (f. णी) (= sick) ; (2) असुस्थ (f. स्था) (= ill.).

INVALIDATE : मोघीकरोति : v. TO FRUSTRATE.

INVALIDITY : अप्रामाण्यं ; दुर्बलता (= weakness : q. v.).

INVALUABLE : (1) अमूल्य (f. ल्या) ; (2) अनर्घ (f. र्घा) *or* अनर्घ्य (f. र्घ्या).

INVALUABLENESS : (1) अमूल्यता ; (2) अनर्घ(र्घ्य)ता.

INVARIABLE : expr. by adv. : v. also UNCHANGEABLE.

INVARIABLY : (1) नित्यं ; (2) सततं : v. ALWAYS.

INVASION : आक्रमणं : v. ATTACK, INROAD.

INVECTIVE : आक्षेपः, अवक्षेपः *or* अधिक्षेपः. [also TO ABUSE.

INVEIGH AGAINST : (1) कुत्सां करोति (with gen.), Mah. ; (2) धिक्करोति : v.

INVEIGLE : (1) प्रलोभयति (c. of लुभ्) (= to tempt) ; (2) पातयति (c. of पत्) (= to fell) (when the sense is clear).

INVENT : सृजति (सृज्, c. 6.) : v. TO CREATE.

INVENTION : सृष्टिः (both in good and bad sense).

INVENTIVE : Ph. *i. power* उद्भावन- *or* उत्पादन-शक्तिः.

INVENTOR : स्रष्टृ (m.) (= creator.) ; उद्भावयितृ (m.).

INVENTORY : परिसंख्या, "*i. of all I have*" मम सर्वस्वपरिसंख्या (?).

INVENTRESS : स्रष्ट्री (?) ; उद्भावयित्री (?) ; प्रसूः (= mother).

INVERSE : (1) विपर्यस्त (f. स्ता) (?) ; (2) व्यत्यस्त (f. स्ता) (?).

INVERSELY : (1) विपर्ययेण (?) ; (2) विपर्यासेन (?).

INVERSION : (1) विपर्यायः (?) ; (2) व्यत्ययः (?).

INVERT (v. t.) : विपर्यासयति (c. of अस्) (?). Ph. : *reads i.ing the first and the second personal pronoun* युष्मदस्मदोर्व्यत्ययेन पठति, Mu. v. ; *the thickness and thinness of trees are (now) i.ed* विपर्यासं यातो घनविरलभावः क्षितिरुहां, U. II. 27.

INVEST : I. To put on : q. v. : परिधापयति (c. of धा). II. To endow : q. v. : योजयति (युज्, c. 10.). III. To adorn : q. v. : भूषयति (भूष्, c. 10.). IV. To besiege : q. v. : रुणद्धि (रुध्, c. 7.). V. Of money : प्रयोजयति (??), *i. your money in shares* *त्वं धनेन मूलांशान् क्रीणीहि.

INVESTIGATE : अनुसन्दधाति (धा, c. 3.) (?) : v. TO ENQUIRE.

INVESTIGATION : अनुसन्धानं : v. ENQUIRY, EXAMINATION.

INVESTIGATOR : अनुसन्धातृ (m.) : v. ENQUIRER, EXAMINER.

INVESTITURE : (1) प्रतिष्ठा (?) ; (2) अभिषेकः (of kings) ; (3) उपनयः,-नं (of the first three castes with their thread).

INVESTMENT : I. Of money : प्रयोगः *(?)* : v. TO INVEST (v). II. A seige : q. v. : रोधः. III. A robe : वासस् (n.).

INVETERACY : gen. expr. by adj. *I. of enmity* वैरानुबन्धः, M. n.

INVETERATE : (1) बद्धमूलः (ला, लं) ; (2) दृढमूलः (ला, लं) ; (3) स्थिरः (रा, रं) v. FIRM. Ph. : *not free from i. rage* भृशमासेवितया रुषा न मुक्तः. Ki. XIII. 5.

INVETERATELY : (1) निर्बन्धेन ; (2) अनुबन्धेन : v. also FIRMLY.

INVIDIOUS : (1) द्वेषजनन (f. नी) (?) ; (2) सन्तापक (f. पिका) (?).

INVIDIOUSLY : द्वेषं *or* कोपं *or* सन्तापं जनयत् (f. न्ती).

INVIDIOUSNESS : expr. by adj. *or* circum.

INVIGORATE : बलं or सत्त्वं or तेजः वर्धयति (c. of वृध्).

INVIGORATING : बलदः (दा, दं), Bha.

INVIGORATION : (1) बलदानं, Bha.; (2) सत्त्वोपचयः ; (3) तेजोवृद्धिः.

INVINCIBLE : (1) अजेयः (या, यं) ; (2) दुर्जयः (या, यं) ; (4) अजय्य (f. य्या), Si. xx. 77.

INVINCIBILITY, INVINCIBLENESS : अजेयता ; दुर्जयता ; etc.

INVINCIBLY : (1) दुर्जयं etc. ; (2) better by adj.

INVIOLABILITY : (1) अलङ्घ्यता ; (2) अनतिक्रमणीयता; (3) अधृष्यता.

INVIOLABLE : (1) अलङ्घ्य (f. ङ्घ्या) or अलङ्घनीयः (या, यं), *we have been made i. by demons* विघ्नप्रतिपक्षतयालङ्घनीये कृते स्तः, V. II. ; (2) अनतिक्रमणीयः (या, यं), *your words are also i.* अनतिक्रमणीयवचनो भवानपि, Mu. II.

INVIOLABLY : expr. by adj. *or* circum.

INVIOLATE : (1) अक्षत (f. ता) ; (2) अक्षतः (ता, तं).

INVIOUS : दुर्गमः (मा, मं) : V. IMPASSABLE.

INVISIBILITY : (1) अदृश्यता ; (2) अदर्शनीयता etc.

INVISIBLE : (1) अदृश्य (f. श्या) (best equiv.), *i. forms* तनूरदृश्याः, Ki. XIV. 60. ; (2) दृष्टिपथातीतः (ता, तं) and sim. comp.s. *To become i.* : i. e. to disappear : q. v. : अन्तर्धीयते (pass of धा).

INVISIBLY : expr. by adj. *or* comp., *to strike i.* अदृश्यः प्रहरति.

INVITATION : निमन्त्रणं, उप-, *in not keeping i.* निमन्त्रणातिक्रमे, V. s.

INVITE (v.) : I. Lit. : निमन्त्रयति, उप-, (मन्त्र्, c. 10.), *I will i. a Brahmin* अहं ब्राह्मणमुपनिमन्त्रयामि, Mr. ; *an i.d (person) not eating after saying "very well"* [i. e. *after accepting an invitation*] निमन्त्रितस्तथेत्युक्त्वाभुञ्जानः, V. s. II. Fig. : आह्वयति (ह्वे, c. 1.), *as if i.d by the cries of swans* कलहंसानां कोलाहलैराहूयमान इव, K. [V. s.

INVITER : निमन्त्रयितृ (f. त्री), *and double food to the i.* निमन्त्रयितुश्च द्विगुणमन्नं,

INVITING : (adj.) : i. e. alluring : (1) आकर्षिन् (f. णी); (2) मनोहरः (रा, रं) V. CHARMING, BEAUTIFUL.

INVITINGLY : expr. by adj. *or* circum.

INVOCATION : in books : मङ्गलाचरणं, K.

INVOICE : *भाराङ्कपत्रं.

INVOKE : (1) आह्वयति (ह्वे, c. 1.) v. TO CALL ; (2) वन्दते (वन्द्, c. 1.) (= to salute : in prayer), R. I. 6.

INVOLUNTARILY : (1) स्वेच्छया *or* स्वेच्छापूर्वं... न v. VOLUNTARILY ; (2) स्वेच्छाविरुद्धं (against wish).

INVOLUNTARY (1) न स्वेच्छापूर्व (f. र्वा) v. VOLUNTARY ; (2) स्वेच्छाविरुद्ध (f. द्धा) (against wish).

INVOLUTION : I. Complication : जटिलता. II. In math. : संवर्गीकरणं.

INVOLVE : I. To envelop : q. v. : अवगुण्ठयति (गुण्ठ्, c. 10.). II. To comprise, contain : q. v. : परिगृह्णाति (ग्रह्, c. 9.). III. To implicate : expr. by श्लिष्ट: (ष्टा, ष्टं), *"his end with mine i.d"* तदर्थो मदर्थश्लिष्ट:. IV. To overwhelm : expr. by ग्रस्त (f. स्ता), *i.d in calamity* विपद्ग्रस्त (f. स्ता). V. In math. : *i.ing to the third power* सहप्रचयसंवर्ग:, A. b.

INVULNERABLE : (1) अभेद्य (f. द्या) (= not to be pierced), Ram. ; (2) by circum. v. WOUND.

INWARD : अन्तर्गत: (ता, तं) : v. INTERNAL.

INWARDLY : अन्तर् : v, INTERNALLY.

INWEAVE : perh. संवपति (वप्, c. 1.) ; संग्रथ्नाति (ग्रन्थ्, c. 9.).

INWROUGHT : (1) खचित: (ता, तं) ; (2) अलङ्कृत: (ता, तं) (= adorned).

IODINE : *धूम्राश्मन् (m.) ; अयोदनं.

IOTA : (1) अणु:, *you have not an i. of fear* न तेऽस्ति भयमण्वपि, V. p. v. 37. 66. ; (2) लव:, *even an i. of a master's favour* प्रभुप्रसादलवोऽपि, K.

IOU : अहं त्वां धारयामीति पत्रं.

IRASCIBILITY : (1) क्रोधशीलता ; (2) सुलभकोपता ; (3) चण्डता. [TABLE.

IRASCIBLE : (1) क्रोधशील: (ला, लं) ; (2) सुलभकोप: (पा, पं), Sa. : v. IRRITABLE.

IRE : कोप: : v. ANGER, RAGE.

IREFUL : अमर्षण (f. णा), Mah. III. 33. 1. : v. ANGRY.

IREFULLY : सकोपं : V. ANGRILY.

IRIDESCENT : इन्द्रायुधसवर्ण (f. र्णा) (?) ; better by circum.

IRIS : I. The rainbow : q. v. : इन्द्रायुधं. II. Of the eye : *उपतारा. II. A plant : गोलोमी.

IRK : खेदयति (c. of खिद्) : V. TO TROUBLE, WEARY.

IRKSOME : खेदकरः (री, रं) : V. TIRESOME, WEARISOME.

IRON (subs.) : I. The metal : (1) लोह or लौह (mn.), *impure i.* अशुद्ध-लोहं ; *i.-flings* लोहभवं चूर्णं, Bha. ; (2) अयस् (n.), *tiffed or pointed with i.* अयोमुख (f. खी), Ka. *Wrought i.* कुशी. *Green sulphate of i.* धातु-शेखरं. *Red sulphate of i.* धातुकासीसं. *Made of i* : (1) लौह (f. ही) ; (2) लोहलः (ला, लं) : V. MADE OF. II. An iron implement : लोहखण्डं or लोहः (?). III. In pl., fetters : q. v. : लोहशृङ्खलं.

IRON (adj.) : by comp., *i. image* लोहप्रतिमा.

IRON-HEARTED : (1) अयोहृदयः (या, यं), R. and sim. comp.s ; (2) अश्म-हृदयः (या, यं) (= stone-hard), K.

IRON (v.) : *लोहेन श्लक्ष्णीकरोति.

IRONICAL : काकाक्षिम (f. मा), Kav.

IRONICALLY : (1) काकाक्षिम्य ; (2) काकुवाक्येन.

IRONMONGER : लोहकारः or लौहकारः, Ram. II. 90. 23.

IRONMONGERY : लोहभाण्डानि (n. pl.).

IRONY : काकाक्षिमं व्यङ्ग्यं, Kav. ; काकुभाषितं and sim. comp.s.

IRRADIATE : दीपयति (c. of दीप्) : V. TO BRIGHTEN.

IRRADIATION : प्रद्योतनं : V. ILLUMINATION.

IRRATIONAL : I. Void of reason : (1) विवेकहीनः (ना, नं), विवेकरहितः (ता, तं), etc., *even among the i. animals* पशोरपि विवेकविवर्जितस्य, P. II. p. ; (2) अविवेकः (का, कं), S. II. Unreasonable : q. v.

IRRATIONALLY : (1) अविवेकपूर्वकं ; (2) निर्विवेकेन.

IRRECLAIMABLE : अशोध्य (f. ध्या) : V. TO RECLAIM.

IRRECONCILABLE : I. Implacable : अप्रतिसमाधेयः (या, यं). II. Inconsistent : असमञ्जसः (सा, सं).

IRRECONCILABLY : अप्रतिसमाधेयं (?) ; better by adj.

IRRECOVERABLE : असाध्य (f. ध्या) : v. TO RECOVER.

IRREFRAGABLE : अखण्ड्य (f. ण्ड्या) : v. INCONTESTABLE, UNDENIABLE.

IRREFRAGABLY : अखण्ड्यं *or* अखण्डनीयं (?) ; better by adj.

IRREFUTABLE : (1) अखण्ड्य (f. ण्ड्या) ; (2) better by circum. v. TO REFUTE.

IRREGULAR : (1) अवैधः (धी, धं) (= against rule) v. REGULAR ; (2) विषमः (मा, मं) (= uneven : as of motion) ; (3) उच्छृङ्खलः (ला, लं) (in conduct). In gram. : perh. विशेष- ; निपातितः (ता, तं), Wilson.

IRREGULARITY : I. In gen. : (1) अवैधता ; (2) वैषम्यं (as of motion). II. In gram. : निपातनं (?). III. Of conduct : उच्छृङ्खलं चरितं, Vi. II. 29.

IRREGULARLY : (1) अवैधं ; (2) विषमं ; (3) उच्छृङ्खलं.

IRRELEVANT : (1) अप्रासङ्गिकः (की, कं) ; (2) असंलग्न (f. ग्ना).

IRRELIGION : (1) अधर्मः,-ता ; (2) विधर्मता : v. IMPIETY.

IRRELIGIOUS : (1) अधार्मिकः (की, कं) ; (2) विधर्मिन् (f. णी) : v. IMPIOUS.

IRRELIGIOUSLY : (1) अधर्मेण ; (2) धर्ममुल्लङ्घ्य etc.

IRRELIGIOUSNESS : अधार्मिकता : v. IRRELIGION.

IRREMEDIABLE : (1) अप्रतिकार्य (f. र्या) ; (2) अप्रति(ती)कारः (रा, रं) : v. also INCURABLE.

IRREMEDIABLY : by adj. *or* comp., *i. fierce* अप्रतीकारदारुणः, K.

IRREPARABLE : (1) अप्रतिसमाधेयः (या, यं) ; (2) अप्रतिकार्य (f. र्या).

IRREPARABLY : (1) अप्रतिसमाधेयं ; (2) better by adj.

IRREPREHENSIBLE : अनिन्द्य (f. न्द्या) : v. BLAMELESS, FAULTLESS.

IRREPROACHABLE : (1) निरवद्य (f. द्या) ; (2) अनिन्द्य (f. न्द्या) v. BLAMELESS.

IRREPROACHABLY : expr. by adj. *or* circum.

IRRESISTIBLE : (1) अनिवार्य (f. र्या) ; (2) दुर्निवारः (रा, रं).

IRRESISTIBLY : expr. by adj. *or* comp.

IRRESOLUTE : I. Fickle : q. v. : अस्थिरचित्त: (त्ता, त्तं). II. Undetermined, hesitating : v. TO HESITATE, DETERMINE.

IRRESOLUTELY : अस्थिरचित्तेन : v. also HESITATINGLY. [q. v. : अनिश्चय:.

IRRESOLUTION : I. Fickleness : q. v. : अस्थिरचित्तता. II. Hesitation :

IRRESPECTIVE OF : विहाय (= leaving), अगणयित्वा (= not caring), or निरपेक्ष्य (without looking), (all with acc.).

IRRETRIEVABLE : अप्रतिसमाधेय: (या, यं) : v. IRREPARABLE.

IRREVERENCE : (1) अभक्ति: ; (2) अनादर: (= disregard.).

IRREVERENT : (1) भक्तिहीन: (ना, नं) ; (2) अधार्मिक (f. की) (= irreligious).

IRREVOCABLE : (1) अनिवर्त्य° (f. र्त्या), Mit. ; (2) better by circum., *the curse has been already pronounced, it is now i. by me* दत्त एव शाप: । सम्प्रति मया नान्यथा भवितुमर्हति, K.

IRREVOCABLY : expr. by circum.

IRRIGATE : सिञ्चति, अव-, नि-, (सिच्, c. 6.).

IRRIGATION : (1) सेक:, अव- ; (2) सेचनं, अव-, (of the act only).

IRRITABILITY : I. Irascibility : चण्डस्वभाव:. II. A susceptibility : expr. by ज्वलति (ज्वल्, c. 1.) (= to burn) : v. also IRASCIBLE.

IRRITABLE . (1) कोपन: (ना, नं) ; (2) क्रोधन: (ना, नं) ; (3) रोषण (f. णा) ; (4) चण्ड (f. ण्डा or ण्डी of women). [excite : ज्वलयति, (c. of ज्वल्) (?).

IRRITATE : I. To provoke : कोपयति, उत्-, प्र- : v. ENRAGE. II. To

IRRITATION : I. Anger : q. v. : कोप:. II. Of the body : ज्वाला (?).

IRRITATIVE : i. e. *causing irritation* : expr. by comp.

IRRUPTION : उपद्रव: : v. DEPREDATION.

ISINGLASS : *फीष्फुषं ; मत्स्यान्त्रजो घनसार:.

ISLAM : महम्मदीयधर्म:.

ISLAND (adj.) : (1) by comp. ; (2) द्वैप्य (f. प्या), Si.

ISLAND (subs.) : द्वीप (mn.), *the i. of Java* (?) यवद्वीपं, Ram.

ISLANDER : द्वीपवासिन् (m.), and sim. comp. inhabitant.

ISLE : V. ISLAND, *An alluvial. i.* : पुलिनं, etc.

ISLET : क्षुद्रद्वीप (mn.) : v. SMALL. [अपपावित: (ता,.तं).

ISOLATE : विश्लेषयति (c. of श्लिष्) : v. TO INSULATE. *I.d from a society.* :

ISOLATION : expr. by above, separately : q. v.

ISOSCELES : *i. triangle* समद्विबाहुत्रिभुज:, K. d. and sim. comp.s.

ISOTHERMAL : *समोत्तापगर्भ (f. र्भा).

ISSUE (subs.) : I. Flow, egress : q. v. : नि:सरणं. II. Result : q. v. : (1) फलं ; (2) परिणति: (= end), *whether there be a happy i. or not* कल्याणी परिणतिरस्तु वान्यथा, Vi. VI. 28 ; (3) उदर्क: (= future), *sweet in i.* उदर्कस्वादु (mfn.). III. In law : *point at i.* विचार्यविषय:. IV. Progeny : q. v. : सन्तति:. V. A discharge : q. v. : स्राव:.

ISSUE (v. i.) : I. To come out, flow : q. v. : अपैति (इ, c. 2.), *i.ing from the arrow* अपयन् धनुष:, Ki. II. To spring : q. v. : प्रभवति (भू, c. 1.). III. To end : q. v. : परिणमति (नम्, c. 1.).

ISSUE (v. t.) : I. To deliver : q. v. : समर्पयति (c. of ऋ). II. To put into circulation : *वहिर्गमयति (c. of गम्) (after Bengali). III. To publish : प्रचारयति (c. of चर्).

ISTHMUS : *योजक:, *i. of Suez* *सुयजयोजक:.

IT : expr. by the "n., m., *or* f. form" of pron.s given under *he* according as the noun for which it stands is in Sanskrit, n., m., *or* f. : *I have to say much about it* मम बह्वाख्येयमत्र, Mr. ; *what is it (you) are thinking of* इदं किं चिन्त्यते, Mr. ; *it is she* सैवेयं, Na. ; *whether it* (भाण्डक:) *is the same or not* स एवैष न वेति, Mr. ; *therefore it* (पृथ्वी) *looks even* अत: सा समा प्रतिभाति, Go. ; *its* (मञ्जर्या:) *smell* अस्या गन्ध:, K. ; *Is it true* अपि नाम सत्यं, Ma. ; *it is said in the Purana that the earth is even* पुराणे भू: समा कथ्यते, Go. ; *it has been established in the first part that the Lord of all is the creative cause of the world* प्रथमेऽध्याये सर्वेश्वरो जगत उत्पत्तिकारणं प्रतिपादितं, S. ; *if you think it not*

very tiresome to go यदि नातिखेदकरं गमनं कलयसि, K. *N. B.* note how it is expr. in such cases.

ITALICS : *इतालीयवर्णः.

ITALICIZE : *इतालीयवर्णैर् लिखति (लिख्, c. 6.).

ITCH (subs.) : (1) कण्डूः, *of the i. of arrogance* दर्पज्मन: कण्डूः, Si. I. 48. ; (2) कण्डूतिः ; (3) खर्जूः (the disease) ; (4) कण्डूयनं (i.ing).

ITCH (v.) : कण्डूयति,-ते (nomi.), *i.ing* कण्डूया.

ITCHY : कण्डूलः (ला, लं) : v. ITCH (subs.).

ITEM : (1) पदं ; (2) विषयः (= subject). [II. To do again : पुनः करोति.

ITERATE : I. To utter again : पुनः पुनर्वदति (वद्, c. 1.), वक्ति (वच्, c. 2.), etc.

ITERATION : I. Repetition : पुनरुक्तिः. II. Doing again : पुनःक्रिया.

ITINERANT : (1) भ्रमणशीलः (ला, लं) ; (2) भटमानः (ना, नं).

ITINERARY : *भ्रमणवर्णनं and sim. comp.s.

ITINERATE : (1) पर्यटनं करोति ; (2) परिभ्राम्यति (भ्रम्, c. 4.).

ITSELF : स्वयं or स्वयमेव, Sr. Ph. : *the mind i.* चेत एव, Ki. ; *by nature i.* स्वभावेनैव, H. ; *fresh cloud, by i.* केवलोऽपि नवाम्बुदः, R. XI. 80.

IVORY : I. Subs. : गजदन्तः and sim. comp.s ; दन्तः (when meaning clear). II. Adj. : expr. by comp., *swords with pure i. hilts* शुद्धदन्तत्सरूनसीन्, Mah. ; *i. seat* गजदन्तासनं, R. XVII. 21.

IVY : लताविशेषः, *"i.-mantled"* *इव्यावगुण्ठितः (ता, तं).

J

JABBER : जल्पति (जल्प्, c. 1.) : V. TO BABBLE.

JABBERER : जल्पाकः : V. BABBLER.

JABBERING : जल्पितं, प्र- : v. BABBLING.

JACK : I. The tree : (1) पनसः ; (2) कण्टकिफलः. II. The fruit : पनसं. III. A fellow : माणवकः. IV. For boots : *निष्कर्षकः. V. A pike : जलसूचिः. VI. A frame : भारः.

JACK-A-LANTERN : भूतदीपिका ; भूतालोकः.

JACKAL : (1) शृगालः ; (2) गोमायुः ; (3) जम्बूकः ; (4) फेरुः or फेरवः.

JACKANAPES : I. A monkey : q. v. II. Fig. : वानरः.

JACKASS : गर्दभः (both lit. and fig. = blockhead).

JACK-DAW : काकविशेषः.

JACKET : (1) चोलः,-कः ; (2) कूर्पासकः.

JACK-PUDDING : भण्डः : v. BUFFOON.

JADE (subs.) : I. A bad horse : कदश्वः. II. A bad woman : बन्धकी.

JADE (v.) : खेदयति (c. of खिद्) : v. TO TIRE. *J.d* : खिन्नः (न्ना, न्नं) : v. FATIGUED.

JAGGED (adj.) : (1) जर्जरः (रा, रं) ; (2) बन्धुरः (रा, रं) (as of rocks).

JAIL : (1) कारा,-गारं ; (2) चारः,-कः ; (3) बन्धनालयः.

JAIL-BIRD : काराभोगिन् (f. नी) (?) ; भुक्तचारकः (का, कं) (?).

JAILER : (1) काराध्यक्षः ; (2) चारकनायकः ; and sim. comp.s.

JALAP : *जलपं ; रेचकमूलविशेषः.

JAM : *पिष्टमिष्टं, *greengage j.* *हरितकपिष्टमिष्टं.

JAMB : चवयष्टणी (?), A.

JANGLE : v. TO WRANGLE, QUARREL.

JANISSARY : तुरुष्कसैनिकविशेषः.

JANUARY : उत्तरपौषपूर्वमाघसंवादीयुरूपीयवर्षस्य प्रथममासः.

JAPAN : a varnish : *यावनं, -कुङ्कुभः.

JAR (subs.) : I. A vessel : चलिञ्जरः (?), Mah. II. Harsh sound : कर्कशशब्दः. III. Clash, quarrel : q. v. : कलहः. Ph. ; *on the j. or ajar* : अर्धविहृतः (ता, तं).

JAR (v.) : I. Of sounds : विस्वरं करोति. II. To quarrel : q. v.

JARGON : perh. प्रलपितं or प्रलापः.

JARRING (adj.) : (1) कर्णकर्कशः (शा, शं) ; (2) विस्वरः (रा, रं).

JASMINE : (1) मल्लिका (= Arabian j.) ; (2) मालती (= j. grandiflorum) ; (3) जातिः (= 2) ; (4) नवमालिका (double j.) ; (5) कुन्दः (j. pubescens) ; (6) हेमपुष्पिका (= yellow j.). *N. B.* These also indicate the flower, except (5), for which use neuter.

JASPER : जाफ्ं (in Káchári and Assamese dialects).

JAUNDICE : (1) पाण्डुरोगः ; (2) पाण्डुरः ; (3) कामला.

JAUNDICED : I. Lit. : पाण्डुरोगिन् (f. णी). II. Fig. : दूषितः (ता, तं).

JAUNT : I. Subs. : (1) भ्रमणं (= rambling) ; (2) विहारः or विहरणं (for pleasure), *j. in a wood* वनविहरणं, Si. II. Verb : v. TO RAMBLE.

JAUNTY : v. FRESH, LIVELY. *J. car* विहतयानं (?).

JAVELIN : (1) शल्यं ; (2) शूलं ; (3) प्रासः : v. DART.

JAW : I. Lit. : हनुः (नूः), *j.ed* हनुमत् (f. ती) ; *upper, lower j.* उत्तरा, अधरा हनुः, T. A. *Lower j.* : चिबुकं. II. Fig. = mouth : q. v. : *before you fall into my j.s* यावन्मम दंष्ट्रान्तर्गतो न भवान् भविष्यति, P. I. 8. ; *to the j.s of death* यमस्य जम्भयोः, T. A.

JAY : (1) चाषः ; (2) किकिदीविः ; (3) नीलकण्ठः. [III. Zealous : q. v.

JEALOUS : I. Envious : q. v. : ईर्ष्यिन् (f. णी). II. Suspicious : q. v.

JEALOUSLY : (1) ईर्ष्यया ; (2) साभ्यसूयं.

JEALOUSY : (1) ईर्ष्या, Si. XI. 37. ; (2) अभ्यसूया, Ku. III. 4.

JEER (v.) : अवहसति (हस्, c. 1.) : v. TO DERIDE, MOCK.

JEER (subs.) : अवहासः : v. DERISION, MOCKERY.

JEERINGLY : (1) अवहासपूर्वकं ; (2) सोपहासं ; (3) अवहस्य.

JEJUNE : I. Hungry : q. v. II. Dry, meagre : शुष्क (f. ष्का).

JEJUNELY : (1) शुष्कं ; (2) नीरसं ; (3) कर्कशं (?).

JEJUNENESS : (1) शुष्कता ; (2) नीरसता ; (3) कार्कश्यं (?).

JELLY : *जाली, *calve's-foot-j.* *वत्सपादजाली.

JELLY-FISH : *जालीमत्स्यः ; जालीदर्शमी मत्स्यः.

JEOPARD, JEOPARDIZE : संशयस्थं (f. स्थां) करोति : v. TO ENDANGER.

JEOPARDY : संशयः : v. DANGER.

JERK : वि-धुवति (धू, c. 6.) (= to shake : q. v.).

JERKIN : a jacket : चोलः,-कः.

JERUSALEM ARTICHOKE : *दिवाकरमूलः (the plant), -लं (the root).

JESSAMINE : v. JASMINE.

JEST (subs.) : I. Lit. : परिहासः, *jabbering in j.* परिहासविजल्पितं, Sa. II. ; *even in j.* परिहासकथास्वपि, R. IX. 8. II. Object of j. : परिहासास्पदं and sim. comp.s.

JEST (v.) : परिहसति (हस्, c. 1.) ; परिहासं करोति.

JESTER : (1) परिहासयितृ (m.) ; (2) वैहासिकः ; (3) विदूषकः.

JESTINGLY : (1) परिहासेन ; (2) परिहासपूर्वं.

JESUIT : *यिशुदेवः (वा, वं). *J.'s bark* : *पिरुवल्कलं.

JESUITIC,-AL : I. Lit. : expr. by comp. II. Cunning, deceitful : q. v.

JET (subs.) : I. A stone : perh. नीलगोमेदः (comp. gagates). II. Of water : उत्सेकः.

JET-BLACK : घोरकृष्ण (f. ष्णा) (?).

JETTY (subs.) : no equiv. : *भृतिः ; यातिः.

JEW : *यिहुदिः. *J.ess* : *यिहुदिस्त्री and sim. comp.s.

JEWEL : रत्नं : v. GEM.

JEWELLED : (1) by comp. ; (2) मणिमयः (यी, यं) ; (3) रत्नखचितः (ता, तं).

JEWELLER : (1) मणिकारः ; (2) रत्नाजीविन् (m.).

JEWISH : *यिहुदीयः (या, यं).

JIBE (v.) : इतस्ततः चालयति, सं-, (c. of चल्) (?).

JIG : a dance : पञ्चविन्दुप्रसृतिः (?), D. VIII.

JILT (subs.) : चपला (?) ; विप्रलम्भिका (after विप्रलब्धा, Sah. III.).

JILT : (v.) : विप्रलभते (लभ्, c. 1.), *I am clearly j.ed* व्यक्तमस्मि विप्रलब्धा, D. III.

JINGLE (v.) : शिंक्ते (शिञ्ज्, c. 7.) : v. TO TINKLE.

JINGLE (subs.) : शिञ्जा *or* शिञ्जितं : v. TINKLING.

JINGLING (adj.) : (1) शिञ्जिन् (f. नी) ; (2) झणझणायमानः (ना, नं).

JOB (subs.) : I. A work : सामान्यकर्मन् (n.). II. A public transaction for private profit : स्वार्थपरं कार्यं (?). Ph. : *to do a j. for one* i. e. *to kill* शमयति (c. of शम्), Vi. III. 24.

JOBBER : सामान्यकर्मकारिन् (f. णी) (?).

JOCKEY (subs.) : अश्वलालयिकः : v. also GROOM.

JOCKEY (v.) : v. TO CHEAT, DECEIVE : (also of men), *j. and quarrelsome* हासकरः कलहरतिः, Sah.

JOCOSE : I. Of expressions etc : (1) हासकरः (री, रं), etc. (= exciting laughter) ; (2) हासगर्भ (f. र्भा), etc. (= containing laughter) ; (3) विनोदिन् (f. नी) *or* विनोदकरः (री, रं) (= amusing). II. Of persons : परिहासशीलः (ला, लं) ; रसिकः (का, कं) (= witty).

JOCOSELY : (1) परिहासेन ; (2) परिहासपूर्वं.

JOCOSENESS : I. Of style etc. : हासकरत्वं,-ता, etc. II. Of persons : परिहासशीलता etc. Better by adj. : v. JOCOSE.

JOCULAR, JOCULARITY, JOCULARLY : V. JOCOSE,-NESS,-LY.

JOCUND : सरसः (सा, सं). : V. MERRY. [मन्दं मन्दं सर्पति (सृप्, c. 1.).

JOG (v.) : I. To push gently : चालयति (c. of चल्) (?). II. To i. on :

JOG (subs.) : "*to give an invisible j.*" अदृश्यमीषदपसारणं करोति (?).

JOG-TROT : I. Lit. : गजगतिः (?). II. A habitual mode of action : गजगतिः (?).

JOIN (v. t.) : I. To unite : q. v. : युनक्ति *or* योजयति, सं-, आ-, (युज्, c. 7. and 10.), *you have j.ed yourself in great penances* आयोजितस्तपसि महत्यात्मा, K. II. To come to, go over : गच्छति (गम्, c. 1.), याति (या,

c. 2.), एति (इ, c. 2.), etc., *j.ed Judhisthira with his forces* बलेनागाद्युधिष्ठिरं ; *Dhristaketu j.ed the sons of Pandu* धृष्टकेतुरुपागच्छत् पाण्डवान् ; *with the hill-chiefs, j.ed the sons of Pandu* पार्वतीयैर्महीपालैः सहितः पाण्डवानियात् ; *j.ed Durjodhana* दुर्योधनमुपायातौ, Mah. v. 19. 1-17. ; *to j. battle* रणं गच्छति, V. p.

Join (v. i.) : I. Lit. : (1) संयुज्यते (pass. of युज्) (rare) ; (2) by युक्तः (क्ता, क्तं), सं-. II. To take part in : (1) उपागच्छति (गम्, c. 1.) ; (2) उपैति (इ, c. 2.) ; (3) आयाति या, c. 2.).

Joiner : (1) सूत्रधारः ; (2) तक्षन् (m.) (= carpenter : q. v.).

